श्रीजानकीवल्लभो विजयतेतराम

# बुद्धचरिते प्रथमसर्गादारभ्य चतुर्दशसर्गपर्यन्तं दार्शनिकतत्त्वविमर्शः

**M.Phil. Dissertation**
**Submitted for the**
**Partial Fulfillment of the M.Phil. (Arts) Degree in Sanskrit**


**Researcher**
**Smt. Moumita Ghosh**
**Class Roll No.– 001701203010**
**Exam. Roll No.– MPSA194009**
**Registration No. 142341 of 2017-18**
**Session: 2017-19**

**Supervisor**
**Dr. Kakali Ghosh**
**Department of Sanskrit**
**Jadavpur University**

**2019**

# Certificate

This is to certify that the dissertation entitled "बुद्धचरिते प्रथमसर्गादारभ्य चतुर्दशसर्गपर्यन्तं दार्शनिकतत्त्वविमर्शः" submitted by Moumita Ghosh (Class Roll. No. 001701203010 Exam. Roll. No. MPSA194009 Reg. No. 142341 of 2017-18) for the M.phil. Degree (Arts) in Sanskrit from Depertment of Sanskrit, Jadavpur University. The dissertation has been prepared under the supervision of Dr. Kakali Ghosh, Assiociate Professor, Depertment of Sanskrit, Jadavpur University.

Countersigned by

Kakali Ghosh 13.05.2019

(Supervisor)

Dr. Kakali Ghosh

Asslociate Professor

Department of Sanskrit

Jadavpur University

Associate Professor
Department of Sanskrit
Jadavpur University
Kolkata - 700 032

Ashok Kumar Mahata 13.05.2019

(Head of Department)

Dr. Ashok Kumar Mahata

Asslociate Professor

Department of Sanskrit

Jadavpur University

Associate Professor & Head
Department of Sanskrit
Jadavpur University
Kolkata - 700 032

# Certificate

Certified that the thesis entitled, बुद्धचरिते प्रथमसर्गादारभ्य चतुर्दशसर्गपर्यन्तं दार्शनिकतत्त्वविमर्शः submitted by me towards the partial fulfilment of the degree of Master of Philosophy (Arts) in Sanskrit of Jadavpur University, is based upon my own original work and there is no plagiarism. This is also to certify that the work has not been submitted by me in part or in whole for the award of my other degree/diploma of the same Institution where the work is being carried out, or to any other Institution. A paper out of this dissertation has also been presented by me at a seminar at Jadavpur University, thereby fulfilling the criteria for submission, as per the M.Phil Regulation (2017) of Jadavpur University.

Name—MOUMITA GHOSH

Signature Moumita Ghosh. 16.05.2019

Class Roll No—001701203010, Exam Roll No— MPSA194009

Registration number—142341 of 2017-2018

---

(Name/or signature of the M.Phil Student with Roll Number and Registration number)

On the basis of academic merit and satisfying all the criteria as declared above, the dissertation work of Moumita Ghosh entitled, बुद्धचरिते प्रथमसर्गादारभ्य चतुर्दशसर्गपर्यन्तं दार्शनिकतत्त्वविमर्शः is now ready for submission towards the partial fulfilment of the Degree of Master of Philosophy (Arts) in Sanskrit in Jadavpur University.

| | | |
|---|---|---|
| Ashok Kumar Mahata 16.05.19 | Kakali Ghosh 16.05.2019 | Shiuli Basu 16.05.2019 |
| Head Department of Sanskrit | Supervisor & Convener of RAC | Member of RAC |
| Associate Professor & Head<br>Department of Sanskrit<br>Jadavpur University<br>Kolkata - 700 032 | Associate Professor<br>Department of Sanskrit<br>Jadavpur University<br>Kolkata - 700 032 | Associate Professor<br>Department of Sanskrit<br>Jadavpur University<br>Kolkata - 700 032 |

# विषयानुक्रमिका


| | | पृष्ठाङ्काः |
|---|---|---|
| उपोद्घातः | | 1-5 |
| प्रथमोऽध्यायः— | *बुद्धचरिते* वेदान्तदर्शनविमर्शः | 6-13 |
| द्वितीयोऽध्यायः— | *बुद्धचरिते* न्याय-वैशेषिकदर्शनविमर्शः | 14-17 |
| तृतीयोऽध्यायः— | *बुद्धचरिते* सांख्यदर्शनविमर्शः | 18-23 |
| चतुर्थोऽध्यायः— | *बुद्धचरिते* योगदर्शनविमर्शः | 24-30 |
| पञ्चमोऽध्यायः— | *बुद्धचरिते* जैनदर्शनविमर्शः | 31-33 |
| षष्ठोऽध्यायः— | *बुद्धचरिते* बौद्धदर्शनविमर्शः | 34-37 |
| सप्तमोऽध्यायः— | *बुद्धचरिते* आत्मतत्त्वखण्डनम् | 38-43 |
| अष्टमोऽध्यायः— | *बुद्धचरिते* शान्तरसस्य दार्शनिकसमन्वयः | 44-50 |
| उपसंहृतिः | | 51-53 |
| **Bibliography** | | 54-56 |


********

# संकेताक्षरसूची

अ.भा.— अभिनवभारती

आ.वि.— आत्मतत्त्वविवेकः

आ.द.— आर्हतदर्शनम्

ई.उप.— ईशावास्योपनिषद्

ऐ.उप.— ऐतरेयोपनिषद्

क.उप.— कठोपनिषद्

छा.उप.— छान्दोग्योपनिषद्

त.सू.— तत्त्वार्थसूत्रम्

तै.उप.— तैत्तिरीयोपनिषद्

नै.सि.— नैष्कर्म्यसिद्धिः

न्या.सू.— न्यायसूत्रम्

न्या.भा.— न्यायभाष्यम्

बृ.उप.— बृहदारण्यकोपनिषद्

भ.गी.— भगवद्गीता

भ.ना.— भरतनाट्यशास्त्रम्

मा.उप.— माण्डूक्योपनिषद्

मु.उप.— मुण्डकोपनिषद्

मनु.— मनुस्मृतिः

यो.सू.— योगसूत्रम्

वे.सा.— वेदान्तसारः

वै.सू.—वैशेषिक सूत्रम्

वै.सू.उ.— वैशेषिकसूत्रोपस्कारः

श्वे.उप.— श्वेताश्वतरोपनिषद्

सर्व.सं.— सर्वदर्शनसंग्रहः

सा.सू.— सांख्यसूत्रम्

सा.का.— सांख्यकारिका

********

# उपोद्घातः

श्रीमानश्वघोषो बौद्धमहाकविस्तथा दार्शनिकः। एष च राज्ञः कनिष्कस्य समसामयिक इति इतिहासविदः। *बुद्धचरितम्* महाकवेरश्वघोषस्य कवित्वकीर्तेराधारस्तम्भस्वरूपम्। महाकाव्यमिदं बुद्धगर्भाधानादारभ्य बुद्धत्वप्राप्तिपर्यन्तम् अष्टविंशतिसर्गसमन्वितं महाकाव्यम्। तत्र बुद्धगर्भाधाना-दारभ्य  बुद्धत्वप्राप्तिपर्यन्तमालोचना प्रथमसर्गतः चतुर्दशसर्गेषु समुपलभ्यते। एतदेव अश्वघोषस्य मूलरचना। महाकाव्यमिदं भगवतो बुद्धस्य संघर्षमय-सफलजीवनस्य ज्वलन्तोज्ज्वलमयं तथा मूर्तचित्रपटस्वरूपम्। अश्वघोषस्य व्यक्तित्वे धर्म-दर्शन-साहित्यानां कलात्मकसमन्वय उपलब्धः। कोमलान्तःकरणद्वारा नीरस-दुरूह-दार्शनिकतत्त्वं हृदयाङ्गमं न भवति। काव्यसाहाय्येन धर्म-दर्शनयोः तादृक् कठिनतत्त्वमवगृह्यते। बुद्धचरितम् इति महाकाव्ये दार्शनिकसिद्धान्तोपरि गभीर-तत्त्वचिन्तनं दृश्यते।

तत्र दर्शनम् किमिति प्रश्ने दृश्यते साक्षात्क्रियते परमपुरुषार्थोऽनेन यद्वा दृश्यते विविच्यते तथ्यातथ्यमनेनेति दर्शनशब्दस्यार्थः। दृश् धातोः करणार्थे ल्युट्प्रत्ययस्य प्रयोगाद् दर्शनशब्दो निष्पद्यते। तदवस्थायां दृश्यते अनेन इति दर्शनम् अनया व्युत्पत्त्या साधनं चक्षुरतिरिक्तं बुद्ध्यादिकं यदा अवगाहते तदा तत्क्रियान्वयनं दर्शनं भवति। यद्यपि दर्शनमिति पदं चक्षुरिन्द्रियेण सम्बद्धं भवति तथापि तद्सम्बद्धं प्राप्तं च प्रत्यक्षज्ञानं दर्शनविषयीभूतं भवति। अत्र विचार्यते यत्केवलं दर्शने चक्षुरिन्द्रियमात्रेण साक्षात्कृतं ज्ञानमेव गृह्यते, अथवा ज्ञानेन्द्रियपञ्चकेन गृह्यमाणं ज्ञान-समग्रमेव प्रत्यक्षान्तर्गतं स्वीक्रियते। अत्र प्रत्यक्षवस्तुदर्शनस्य विचार्येणैव दर्शनस्य प्रारम्भो भवति। अर्थात् लौकिकपदार्थस्य साक्षात्कारे पदार्थविषकज्ञानस्य ग्राह्यतायाः सम्बन्धे प्रश्न-पूर्विका जिज्ञासैव दर्शनस्य मौलिकं लक्ष्यमुपस्थापयति।

दर्शनशब्देन सह शास्त्रशब्दस्य प्रयोगो नूतनो नास्ति। यत्र दर्शनं साधनमात्रं विद्यते तत्र शास्त्रं तस्यानुशासकं भवति। **शास्त्रपदं शास् धातोर्निषपद्यते। तदनुसारेण यत् शास्ति उपदिशति आज्ञापयति वा तत् शास्त्रं भवतीत्यर्थो विज्ञापयते। शंसुधातोरपि शास्त्रपदस्य निष्पत्तिर्भवति यस्यार्थोऽस्ति प्रकटीकरणमिति**[1]। शासनं तु पुनर्द्वेधा कथितं विधिरूपेण निषेध-रूपेण च। विधिनिषेधपरकं शासनं धर्मेण सम्बद्धं भवति। शासनरूपिणा शास्त्रेण युक्तं दर्शनशास्त्रं दर्शनस्य लक्ष्यं वितनोति। तदा तद् अलौकिकतत्त्वानां ज्ञानस्य साधनमात्रं न भवति, अपि तु लौकिक-कर्तव्त-अकर्तव्ययोः विधिनिषेधरूपयोः स्रोतसा लौकिक-जीवनाचरणयोः परिष्कारस्य साधनमपि जायते। दर्शनस्य  चरमं लक्ष्यं तु अलौकिकः पदार्थ एव भवति। स अलौकिकः पदार्थो

जीवात्मा परमात्मा ब्रह्म वेति विविधाभिः संज्ञाभिः विज्ञायते। इदमात्मतत्त्वं सूक्ष्मतरमस्ति। कथं वयं लौकिकपदार्थविज्ञानस्य जीवनोपयोगं कुर्मः, कथं च अलौकिकतत्त्वसाक्षात्कारस्य योग्यतां प्राप्नुमः, कथं वा जीवनमरणयोः बन्धकानां परिहारं विधास्यामः, एतद्दिशाबोधकं शास्त्रमेव वस्तुतो दर्शन-शास्त्रमित्युच्यते।

भारतीयदर्शने अलौकिकतत्त्वानां सूक्ष्मविश्लेषणस्य ज्ञानस्य च सशक्तं साधनं वर्तते। पाश्चात्त्यानां विचारेण अदृष्टविषयाः सन्दिग्धप्रायाः सन्ति, किन्तु भारतीयानां विचारेण अदृष्टविषयेषु ब्रह्मात्मादिषु सन्देहस्य लेशोऽपि नास्ति। भारतवर्षे तु विविधा दार्शनिकसम्प्रदायाः सन्ति। एकस्यैव सम्प्रदायस्य अनेके विचारकाः वर्तन्ते। तेषां दार्शनिकचिन्तनस्य विविधा ग्रन्था अपि उपलभ्यन्ते। यद्यपि दार्शनिकसम्प्रदायेषु मतवैभिन्न्यं मतवैविध्यं च विद्यते तथापि सर्वेषां मूलभूतमुद्देश्यम्-एकमेवास्ति। भारतवर्षे दार्शनिकचिन्तकानां चिन्तनमार्गा विविधाः सन्ति, परंतु समेषां गन्तव्यमेकमेवास्ति। तात्पर्यमिदं वर्तते यत् समेषां दार्शनिकचिन्तकानां चिन्तने मोक्ष एव लक्ष्यभूतमस्ति। भारतीयदर्शनशास्त्रस्य प्रवृत्तेर्मूलकारणं मोक्षोऽस्ति।

लौकिकजीवनस्य भौतिकसुखसाधनानां च अनित्यतया बोधेन अत्र ऋषयोऽन्तमुखिनो भूत्वा ब्रह्माण्डस्याधारभूतां नित्यां शक्तिं साक्षात्कृतवन्तः। भारतीयचिन्तकैरनुभूतं यत् दृश्यमानस्य जगतोऽस्तित्वमूले काचित् नित्या शक्तिरवश्यमेवास्ति। ब्रह्माण्डे नियतरूपेण दृश्यमानानां परिणामानां तस्या उपरि प्रभावो न निपतति। सा एका अपि शक्तिर्विविधप्रकारेण प्रतिपादिता। श्रुतिरपि बोधयति—**एकं सद्विप्रा बहुधा वदन्ति, अग्निं यमं मातरिश्वानमाहुः**[2]**।** प्राचीनैर्भारतीयैर्मनीषिभिः स्वकीयेन चिन्तनेन इदमपि सिद्धं यद् ब्रह्माण्डमिव प्राणिशरीरमपि तस्याः नित्यायाः शक्तेरायतनभूतमस्ति। अर्थात् यथा परमात्मा ब्रह्माण्डे व्याप्तोऽस्ति तथैव प्राणिशरीरेऽपि। कालान्तरेऽस्य विचारस्य प्रभावादेव यथा पिण्डे तथा ब्रह्माण्डे इत्यस्य सिद्धान्तस्य प्रवर्तनमभवत्। अस्य सिद्धान्तस्यानुसारेण वक्तुं शक्यते यत् यथा बहुषु पात्रेषु एकस्यैव कूपस्य जलं पात्रानुरूपामाकृतिं गृहीत्वा पृथग् भासते, किन्तु तस्य स्वरूपभेदेऽपि एकत्वविषये सन्देहो न भवति तथैव सर्वेषु प्राणिशरीरेषु एकस्यैवात्मनः शरीरानुरूपव्यवहारान् पार्थक्यं प्रतीयते, तथापि यथार्थतः तदीये एकत्वविषयेऽपि सन्देहो नैव करणीयः। यतोहि सर्वेषु प्राणिशरीरेषु विद्यमानं चैतन्यं मूलतः एकमेवास्ति।

अपि च यास्कमते यद्यपि वैदिक-मन्त्र-ब्राह्मणादौ बहूनां देवानां देवीनां च स्तुतिः प्राप्यते, तथापि अखिलस्तुतिरेव एकस्यैव आत्मनः स्तुतौ पर्यवसिता, यतः अन्ये सर्वे देवा एकस्यात्मनोरेव अङ्गप्रत्यङ्गस्वरूपाः। अत एव उच्यते—**एकस्यात्मनोऽन्ये देवाः प्रत्यङ्गानि भवन्ति**[3]।

भारतीयदर्शने आत्मचैतन्यस्य सम्पर्केणैव जीवानां जीवनं सम्भवमिति विचारणे जीवात्मनोः ऐक्यं स्वीकृतमस्ति। तदनुसारेण जीवशरीरस्थ आत्मा परमात्मनो भिन्नो नास्ति। जीवात्मापरमात्मनोर्भेदस्तु केवलः उपाधिगतः अस्ति। एवं जीवब्रह्मणोरैक्यं भारतीयदर्शनस्य अद्भुतं सोपानमस्ति। यत्र वैदिकैः ऋषिभिः ब्रह्मणो नित्यत्वं विभुत्वं प्रतिपादितं, तत्रैव जीवात्मनो रूपेण तस्य शरीरे विद्यमानताऽपि प्रतिपादिता। यथार्थतस्तु शरीरे आत्मरूपेण निहितं तत्त्वमेव ब्रह्मास्ति।

अत्र विचार्यते यत् यदा आत्मरूपेण ब्रह्मैव शरीरे तिष्ठति तदा तस्य साक्षात्कारः कथं न भवति? अस्य प्रश्नस्य जिज्ञासारूपेण उदय एव भारतीयदार्शनिकचिन्तनस्य मूलमिति वक्तुं शक्यते। शरीरे आत्मनो विद्यमानताया विषयेऽपि कश्चित् सन्देहो नास्ति, यतो हि प्राणिनां सर्वाः क्रिया आत्मकेन्द्रिकता भवन्ति, किन्तु तासां सर्वासां क्रियाणां यः कश्चित् केन्द्रबिन्दुर्वर्तते स एव ब्रह्म। तस्यैव प्राधान्यम्, उपनिषदि अत एवोक्तम्—**आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्च**[4]। आत्मनः श्रेष्ठताऽनेन उपनिषद्वाक्येन उपलक्षिता भवति। एतदनुसारेण तस्यात्मनो दर्शनं करणीयम् अर्थात् तदीयः साक्षात्कारो विधेयः, तस्यात्मानो मननं करणीयम् अर्थात् तस्य किं स्वरूपं, कथं च तत्साक्षात्कारो भवितुं शक्यते इत्यादि विज्ञातुं ज्यैष्ठैरनुभविभिः सह पर्याप्तं विचारविमर्शः कार्यः। तेषां तद्विषयकसिद्धान्तानां च श्रवणमपि कार्यम्। तस्यात्मनो मननं करणीयम् अर्थात् स्वाध्यायेन स्वकीयमपि उन्मुक्तं चिन्तनमात्मसाक्षात्काराय आवश्यकमस्ति। यतो हि लोकपरलोकयोः आत्मनोऽपेक्षया श्रेयोऽन्यत् तत्त्वं नास्ति। इदमेव आत्मतत्त्वं चिन्तनं वर्तते।

उपनिषदां दार्शनिकचिन्तनं परतत्त्वसमम्बन्धिन्या जिज्ञासया सम्भवति तत्पर्यवसानं च आत्मजिज्ञासया जायते कालान्तरे उपनिषदां चिन्तनस्य पृष्ठभूमावेव भारतीयदर्शनस्य विविधाः शाखाः प्रादुर्भूताः। भारतीयदर्शनस्य तासु शाखासु जायमानं सकलं चिन्तनं क्रमेण विकासं प्राप्नुवत् मोक्षरूपिणः पुरुषार्थस्य साधकमभवत्। सांख्यशास्त्रे प्रकृतिं मूलकारणं प्रतिपाद्य भोक्तुः पुरुषस्य विवेकमेव तत्त्वज्ञानं प्रतिपादितम्। न्यायशास्त्रे षोडशपदार्थानां तत्त्वज्ञानात् निःश्रेयसः प्राप्तिः निर्दिष्टा। वैशेषिकशास्त्रे विशेषाभिधस्य पदार्थस्य ज्ञानमेव तत्त्वज्ञानमित्यभिमतम्। वेदान्ते तु जीव-ब्रह्मणोरैक्यानुभव एव परमं ज्ञानमस्ति। मीमांसायां पुनर्जन्म-बन्धनान्मुक्त्यर्थं यज्ञादौ प्रवृत्तिरेव तत्त्वसाक्षात्कारस्य उपायरूपता प्रतिपादिता। योगदर्शने अभ्यासवैराग्यानुशीलनद्वारा चित्तवृत्ति-निरोधात् समाधिर्भवति। अवैदिकजैनदर्शने सम्यक्दर्शन-ज्ञान-चरित्रानुष्ठानेन मोक्षो भवति। बौद्धदर्शने तु आर्यसत्य-अष्टाङ्गिकमार्गानुसरणेन निर्वाणलाभो भवति, एवं स्पष्टीभवति यद् भारतीयदर्शनानां लक्ष्यमेकमेवास्ति।

भारतीयसंस्कृतौ दार्शनिकविचाराणां पर्याप्तं महत्वमस्ति। तथाहि भारतीया संस्कृति-धर्मप्राणा संस्कृतिरस्ति, यस्या मूलाधारे आध्यात्मिकज्ञानस्य विकासो वर्तते। पुरा भारतवर्षस्य आध्यात्मिकं ज्ञानं चरमोत्कर्षं प्राप्तमासीत्, तद्धि तत्कालीनानां निर्मलचेतसां महर्षीणामनुभूतस्य सत्यस्य प्रतिष्ठापकमवर्तत। भारतीयसंस्कृतेः मूलभूतानि स्रोतांसि वेद-उपनिषद-पुराणादीनि सन्ति। एषामनवरतमनुशीलनं कुर्वद्भिः विशुद्धमन्तःकरणैः महर्षिभिः तपसा स्वाध्यायेन च लब्धया प्रज्ञया आत्मतत्त्वस्यान्वेषणं विधाय न केवलं प्रकृतेः रहस्यानामुद्घाटनं कृतम्, अपि तु सततचिन्तनेन स्वजीवनमपि सफलीकृतम्। एवं भारतीयं दर्शनं मनीषिणां जीवनानुभवजनिताया आध्यात्मिक-प्रतिभायाः सुपरिणामो वर्तते। स्पष्टमस्ति यद् वेदोपनिषत्सु आधारितानां विविधदार्शनिकसिद्धान्तानां शास्त्रीयपद्धत्या विवेचकानां येषामपि गन्थानां विकासः उपनिषदां परवर्तिनि काले सञ्जातः तेषां गणना दर्शनशास्त्रस्य परिधौ विधीयते। वेदोत्तरकालस्य दार्शनिकविचारधारा मूलतो द्वयोः स्वरूपयोः वर्गीकृता अस्ति—आस्तिक दर्शनं नास्तिकदर्शनं चेति। यानि दर्शनानि वेदोक्तसिद्धान्तान् प्रामाणिकान् न स्वीकुर्वन्ति, तानि नास्तिकानीति कथ्यन्ते। उक्तमेव—

**नास्ति वेदोदितो लोक इति येषां मतिः स्थिरा।**

**नास्तिकास्ते तथास्तीति मतिर्येषां त आस्तिकाः।।**

**अवैदिकप्रमाणानां सिद्धान्तानां निदर्शकाः।**

**चार्वाकप्रभृतयश्च त्रयो लोकेषु नास्तिकाः।।**

**वेदप्रमाणकानीह प्राचुर्ये दर्शनानि षट्।**

**न्यायवैशिषिकादीनि स्मृतास्ते आस्तिकाभिधाः[5]।।**

बुद्धचरितमहाकाव्ये दुःखवादोपरि विशेषविवेचनमुपलभ्यते। इत्यत्र जगद् दुःखमयम् इति अन्वितम्। व्याधि-जरा-मृत्यु एतत् त्रितयं जगति दुःखनिदानम्। तस्य निरोधमवश्यम्भावि। जीवमात्रस्य सुखप्राप्तिः दुःखनिवृत्तिः च उद्येश्यं भवति, तदर्थमेव दर्शनमुपदिशति। *बुद्धचरिते* जगतः अनित्यता मर्मे मर्मे प्रकाशिता। प्रकृत्यर्थे दुःखस्य आत्यन्तिकी निवृत्तिः तथा आनन्दप्राप्तिरनिवार्यतया सर्वेभ्यः काम्या, तदर्थं मोक्ष-मार्गस्योद्भवः। परमपुरुषार्थः साधयन्ति दर्शनानि। मोक्षो हि धर्मार्थकाममोक्षाख्यचतुर्बिधपुरुषार्थेषु परमपुरुषार्थः। अज्ञानं तथा अविद्या बन्धनकारणम्। वासनाबलात् जीवाः मोहचक्रेण आवर्तिताः। प्रज्ञा-शील-संयम-त्याग-शिक्षा-जितेन्द्रियता-अनासक्ति-सत्योपलब्धि-नित्यानित्यज्ञानभेदबुद्धि-अहिंसा-निष्कामता-जितेन्द्रियता

इत्यादिविषयानामालोचना स्पष्टतया *बुद्धचरिते* प्राप्यते। दुःखजर्जरिते समस्याकलिते जगत्सम्पर्के अनित्यज्ञानं *बुद्धचरिते* प्रकाशिता।

एषा दृश्यमाना चराचराणां महती सृष्टिः कथं सञ्जाता, कोऽस्याः कर्ता रचयिता वा, किं सः जगत्कर्ता द्रष्टुं शक्यते इति चेत् कथं सम्भवेत् तदीयः साक्षात्कारः, कथं प्राणिनो जायन्ते म्रियन्ते च, सांसारिकः प्राणी सुखदुःखमोहादिभिः ग्रस्थोऽस्ति, अतः कथं स मुक्तो भवेत्.... इति अजस्रं प्रवहन्ती विचारधारा दर्शनस्य क्षेत्रम्। बुद्धचरितं यद्यपि बौद्धदर्शनाश्रितं महाकाव्यं तथापि बुद्धचरिते सिद्धार्थं प्रति अराडमुनेः सांख्यदर्शनाश्रितं तथा वेदान्ताश्रितं मतं सुस्पष्टं परिलक्षितम्, विम्विसारस्योक्तेः प्रत्युत्तरेण सिद्धार्थस्य जैनदर्शनाश्रितं मतं, योगमार्गानुसारेण सिद्धार्थस्य समाधिः तथा बौद्ध-दर्शनाश्रितं भवचक्रनिदानं ज्ञात्वा सिद्धार्थस्य बुद्धत्वप्राप्तिः निर्वाणप्राप्तिः च परिलक्षिता, सर्वोपरि *बुद्धचरिते* एकाधिकानां दर्शनानां प्रभावो प्राप्यते। तृष्णा तथा मानवहृदयं कथमपि पूर्णतया तुष्टं न भवति, तदर्थं मोक्षशास्त्रस्यावश्यकता। बुद्धचरितम् इति महाकाव्ये अश्वघोषस्य कवित्वशैली दृश्यते, तथापि इत्यत्र काव्याधारे दार्शनिकचिन्ता यादृशतया प्रस्फुटिता तदेव संक्षिप्ततया इत्यत्र मया निगदिता।

********

आकरनिर्देशः

---

[1]पाणिनि धातुपाठे शंसु स्तुतौ, ७२८

[2]ऋक् संहिता १.१६४.४६

[3]निरुक्तम् १.४

[4]बृ.उप. ४.५.६

[5]प्राच्यदर्शनम्

## *बुद्धचरिते* वेदान्तदर्शनविमर्शः

*बुद्धचरिते* द्वादशसर्गे अराडमुनेः मोक्षलाभेच्छुकं कुमारं प्रति वक्तव्यं—यस्य संज्ञा चेतना वा अस्ति, क्षेत्रं तथा देहसम्पर्कितज्ञानं यस्य अस्ति स एव क्षेत्रज्ञः। अज्ञानं, कर्म, तृष्णा च संसारहेतवः। क्षेत्रज्ञः पुरुषः प्रतिबुद्ध-अप्रतिबुद्ध-व्यक्त-अव्यक्तरूप-चतुष्टयज्ञानं सम्यकरूपेण ज्ञात्वा जन्ममरण-बन्धनात् निष्क्रम्य अक्षयपदं ब्रह्म प्राप्नोति। ब्रह्मवादिनो ब्राह्मणा भवसागरे ब्रह्मचर्यं पालयन्ति। तत्र एकचत्वारिंशत्तमेन श्लोकेन उक्तम्– **यथावदेतद्विज्ञाय क्षेत्रज्ञो हि चतुस्तयम्। आजवंजवतां हित्वा प्राप्नोति पदमक्षरम्।।** द्वाचत्वारिंशत्तमेन श्लोकेन उक्तम्– **इत्यर्थं ब्राह्मणा लोके परमब्रह्मवादिनः। ब्रह्मचर्यं चरन्तीह ब्राह्मणान्वसायन्ति च।।** ब्रह्मचारी प्रथमं गृहत्यागं कृत्वा भिक्षुवेशेन शिष्टाचारपूर्वकं शीलं गृह्णीयात्। शास्त्रवित् स सन्तोषमास्थाय एकाकीरागात् भयं दृष्ट्वा, वैराग्यात् परमकल्याणं दृष्ट्वा च इन्द्रियाणि वशीकृत्य  मनसः शमाय चेष्टते। कामेभ्यो विरक्तो भूत्वा विवेकी स पुरुष ध्यानसुखं प्राप्य अपूर्वसुखलाभेन ह्रियते। कामद्वेषविरोधिना शमेनैव स ब्रह्मलोकमाप्नोति। एकपञ्चाशत्तमेन श्लोकेन उक्तम्– **शमेनैवंबिधेनायं कामद्वेषविगर्हिणा। ब्रह्मलोकमाप्नोति परितोषेण वञ्चितः।।** यथा पिञ्जरात् पक्ष्मी बहिरागच्छति, तथा यदा देहादात्मा क्षेत्रज्ञो निःसृतो भवति, तदा मुक्त इत्यभिधीयते । एतत् लिङ्गरहितं, ध्रुवम्, अक्षरं, परमं ब्रह्म– यत् मोक्ष इति तत्त्वज्ञैः कथ्यते। उक्तम्-- **एतत् परमं ब्रह्म निर्लिङ्गं ध्रुवमक्षरम्। यन्मोक्ष इति  तत्त्वज्ञाः कथयन्ति मनीषिणः।।**

ब्रह्म किम्? ब्रह्मसूत्रे ब्रह्मणः स्वरूपम्—आधिव्याधिपरिपीडितो जराजन्म-मरणादिदुःख-दावाग्निदग्धः,क्लेशायासविषण्णः,अज्ञानान्धतमसनिसीलितनयनः,भौतिकविषयायासितान्तरो  जीव आनन्दावाप्तये मोक्षादिगमाय त्रिविधतापविनाशाय मोहापहाराय च जगच्छरण्यं शुद्ध-बुद्ध-मुक्त-स्वभावं जगदीश्वरमाश्रयते। जगदीश्वरो वेदान्तमतेन ब्रह्म इति आख्यायते। तस्य ब्रह्मणः स्वरूपम् उपनिषत्सु बहुधा प्रतिपाद्यते। माण्डुक्योपनिषदि तत्स्वरूपं निगद्यते तत्—**एष सर्वेश्वर एष सर्वज्ञ एषोऽन्तयाम्येष योनिः सर्वस्य प्रभवाप्ययौ हि भूतानाम्**[1]**। नान्तःप्रज्ञं न बहिः प्रज्ञं नोभयतः प्रज्ञम् अदृष्टमव्यवहार्यमग्रह्यम्....एकात्मप्रत्ययसारं प्रपञ्चोपशमं शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेयः**[2]**।।** स परमात्मा अद्वितीयः सर्वव्यापकः सर्वान्तर्यामी साक्षी चैतन्यस्वरूपो निर्गुणश्चेति। न तत्समश्चाभ्यधिकश्च कश्चन। अस्य शक्तिपूर्वा विविधगुणगामयी च। स एव सकलं जगत् सृजति संहरति च। तस्यैव तेजसा निखिलं जगत् द्योतते। स एव प्रकाशानामपि प्रकाशः तेजसां तेजश्च। सूर्यचन्द्रतारकादयो तस्य न प्रकाशने प्रभवः। अग्न्यादिनां तु का कथा। स एवैको विश्वरूपः सर्वदेवमयश्चेति बहुधा वर्ण्यते।  ब्रह्मविषयिणी विविधा आलोचना उपनिषत्सु

प्राप्यन्ते। तत्र वेदान्तसारे ब्रह्म अखण्डं सच्चिदानन्दम् अवाङ्गनसगोचरम् इत्युक्तम्। अखण्डमिति पदस्य खण्डाभावो नाम द्वितीयाभावः अद्वैतं वा इत्युक्तम्। अपि च अखण्डम् इत्यत्र खण्डपदस्यार्थः भेदः। यस्मिन् त्रैकालिकाभावो विद्यते तद् अखण्डम्। भेद इत्यनेन स्वगत-सजातीय-विजातीयाः इति भेदत्रयं ग्रहणीयम्। स्वम् आत्मानं गतः प्राप्तः—यः भेदः स एव स्वगतभेदः। गुणगुणिनोः, अङ्गाङ्गिनोः, वृक्षशाखायोः इत्यादि। एक एव जात्यान्तरगतो यः पारस्परिको भेदः स सजातीयभेदः। वृक्षस्य वृक्षान्तरात् भेद एव सजातीयः। भिन्नो जात्यान्तरगतो यो भेदः प्रतीयमानो भवति स एव विजातीयो भेदः। यथा वृक्षप्रस्तरयोः भेदः, वृक्षे वृक्षत्वं प्रस्तरे च प्रस्तरत्वं सामान्यं विद्यते। उक्तं च—**वृक्षस्य स्वगतो भेद पत्रपुष्पफलादिभिः। वृक्षान्तरात् सजातीयो विजातीयः शिलादितः**[3]॥

विद्वन्मनोरञ्जनीटीकायाम् अखण्डपदमेव अनन्तपदस्य पर्यायशब्दः। येषां शब्दानाम् अक्षरगतपौर्वापर्यं तथा विन्यासक्रमो यद्यपि भिन्नः तथापि अर्थगतसादृश्यं विद्यते ते शब्दाः पर्यायशब्दाः। अनन्तम् इत्यनेन यस्य अन्तं तथा परिच्छेदो नास्ति। आनन्त्यं त्रिविधं देशतः, कालतः, वस्तुतश्च। यत् क्व विद्यते, क्व अपि न विद्यते तत् देशतः परिच्छिन्नम्। यत् कदापि विद्यते, कदापि न विद्यते तत् कालतः परिच्छिन्नम् तन्मध्ये देशतोऽनन्त आकाशः, न हि देशतः तस्य परिच्छेदः अस्ति। आकाशः संसारकारणं, स एव संसारसीमापर्यन्तं परिव्याप्तः। उक्तं च—**वस्तुतो देशतश्चैव कालतश्च त्रिधोच्यते।आनन्त्यम्ब्रह्मणश्चातः सत्याद्यपि च सिध्यति**[4]॥ शंकरमते कालतः अपरिच्छिन्नं वस्तु एव ब्रह्म, कारणं ब्रह्म एव केवलम् अकार्यम्। वस्तुतः परिच्छिन्नः पदार्थ एव घटपटादि। किं च घटाद्यनात्मवस्तूनां त्रिविधत्वं केवलमकार्यम्। वस्तुतः परिच्छिन्नः परिच्छेदः अस्ति। केवलं ब्रह्म एव त्रिविध-परिच्छेदरहितम्। ब्रह्म अनन्यम्।

ब्रह्म सत्, चित्, तथा आनन्दस्वरूपम्। वेदान्तदर्शने सत्तात्रयं वर्तते। पारमार्थिकसत्ता, व्यावहारिकसत्ता, प्रातिभासिकसत्ता च। त्रिकालाबाध्यत्वं पारमार्थिकत्वम्, यावद्व्यवहार-कालाबाध्यत्वं व्यवहारिकत्वम्, यावत् प्रतिभासकालाबाध्यत्वं प्रातिभासिकत्वम्। बाध इत्यस्य अर्थः निषेधः अभावो वा। ब्रह्म पारमार्थिकसत्, कालत्रये ब्रह्मणि बाधो नास्ति। व्यावहारकाले घटपटादेः बाधो न भवति अतः ते व्यावहारिकसत्। शुक्तिरजतादेः अस्तित्वं प्रतीतिकाले एव भवति, ते प्रातिभासिक सत्। ब्रह्म सत्यस्वरूपम्। ब्रह्म चित् अर्थात् चैतन्यस्वरूपं ज्ञानस्वरूपं चेति। उक्तं च– **सत्यं ज्ञानमनन्तं ब्रह्म**[5]। अपि च **अत्रायं पुरुषः स्वयंज्योतिः**[6], **तस्य भासा सर्वमिदं विभाति**[7], **ज्योतिषां ज्योतिः**[8]। ननु एवम् अखण्डसच्चिद्रूपम् अपि ब्रह्म न प्रेक्षावत्-प्रतिपित्सा-गोचरम्। सुखसाधने पुरुषस्य प्रवृत्तिर्भवति। परंतु अशरीरं ब्रह्म न सुखस्वरूपं नापि दुःखस्वरूपम्। श्रुतौ

उक्तम्– **अशीरं वाव सन्तं प्रियाप्रिये स्पृशतः**[9]। आनन्दस्वरूपमेतद्विषये श्रुतिरेव प्रमाणम्। **विज्ञानमानन्दं ब्रह्म**[10], **आनन्दो ब्रह्मेति व्यजनात्**[11], **को ह्येवान्यात् कः प्राण्याद् यदेष आकाश आनन्दो न स्यात्**[12]।

ब्रह्म अवाङ्मनसगोचरम्। वाक् च मनश्च वाङ्मनसी(द्वन्द्व), तयोर्गोचर (तत्पुरुषः), वाङ्मनसगोचरः, न वाङ्मनसगोचरः (नञ् तत्पुरुषः)। वाचा मनसा च ब्रह्म अवगन्तुं न शक्यते। अत्र मनसा इत्यनेन अपवित्रमनसा इत्यर्थः। पापात्मिकं मनः मालिन्यवशाद् आत्मोन्मुखं न भूत्वा संसाराभिभूतं भवति। परंतु मनः यदा काम्य-निषिद्धकर्मवर्जनपुरःसरं नित्यनैमित्तिक-कर्मानुष्ठानवशात् पापमुक्तं निर्मलं भवति तदा एतत् पवित्रमन्तःकरणं शुद्धमात्मानं ग्रहीतुं शक्नोति। श्रुतौ उक्तम्—**मनसैवानुद्रष्टव्यं नेह नानाऽस्ति किंचन**[13]। ब्रह्म वागातीतम्। ब्रह्म शब्दजन्य-परोक्षज्ञानस्य अविषयम्। मायामाश्रित्य अखिलं ज्ञानं परोक्षम्। ब्रह्म अपरोक्षस्वभावम्। ब्रह्मणः अवाङ्मनसगोचरम् इति विशेषणम् अभावात्मकम् तथा सच्चिदानन्दस्वरूपम् इति विशेषणं भावात्मकम्।

ब्रह्म अखिलप्रपञ्चस्य आधारस्वरूपम्। आधारपदं सृष्टेः तथा संहारस्य उपलक्षणम्। तैत्तिरीयोपनिषदि उक्तम्– **यतो वा इमानि भूतानि जायन्ते, येन जातानि जीवन्ति, यत् प्रयन्त्यभि संविशन्ति, तद्विविजिज्ञासस्व तद्ब्रह्म**[14] इति। यो जगतः स्रष्टा, पालकः, संहारकः च स ब्रह्म। स युग्पदेव प्रपञ्चस्य उपादानकारणं निमित्तकारणं च। कुम्भकारो घटं प्रति केवलं निमित्तकारणं, मृत्तिका केवलमुपादानकारणं च। परंतु ब्रह्म प्रपञ्चस्य निमित्तमुपादानं च। एतेन ब्रह्मणः तटस्थलक्षणमुक्तम्। समं च सच्चिदानन्दमित्यंशेन स्वरूपलक्षणं प्रदर्शितम्। यो बाह्य-प्रपञ्चस्य आधारस्वरूपं ब्रह्म स एव देहादेरधिष्ठानमात्मा। इत्यत्र वेदान्तसारे मङ्गलाचरणे आत्मानमित्यस्य विशेषणचतुष्टयम् अखण्डम्,सच्चिदानन्दम्,अवाङ्मसोगोचरम्,अखिलाधारं च। **अखण्डं सच्चिदानन्दमवाङ्मनसगोचरम्। आत्मानमखिलाधारमाश्रयेऽभीष्टसिद्धये**[15]।। इत्यत्र तत्तमसीति महावाक्यार्थः एव उक्तः। छान्द्यग्योपनिषदि तत्तमसीति वाक्येन जीवब्रह्मणोः ऐक्यं प्रतिपादितम्। तच्छब्देन सर्वज्ञस्य ईश्वरस्य, त्वम्पदेन च अल्पज्ञस्य जीवस्य बोधो वाच्यार्थेन। परंतु तयोः ऐक्यं कदापि न सम्भवतीति वाच्यार्थं परित्यज्य लक्ष्यार्थे स्वीकृतेऽभेदो बोध्यते। अखिलाधारपदेन इति पदेन सर्वज्ञेश्वस्य ऊह्येन अहम्पदेन अल्पज्ञजीवस्योल्लेखः कृतः। अखण्डं सच्चिदानन्दम् इति पदेन तत्पदस्य लक्ष्यार्थः कथितः, समं च आत्मानम् इति पदेन प्रत्येकचैतन्यं लक्षितं त्वम्पदस्यार्थरूपेण। उभयोः सामान्याधिकरण्यात् च जीवात्मपरमात्मनोः एकत्वरूपो वाक्यार्थोऽपि शेषः। जीवो ब्रह्मैव नापरः अज्ञानोपाध्यच्छिन्नं व्यष्टिरूपं सत् कारणशरीरं प्राज्ञो जीवो वेत्याख्यायते। समष्टेरीश्वरस्य व्यष्टिरूपो जीवः। सर्वज्ञत्वाल्पज्ञत्वादिभेदेन ब्रह्मजीवात्मनोर्भेदः।

आत्मतत्त्वरूपेण चैतन्यरूपेण च तयोरभेदः। अतएव तत्त्वमसि इति महावाक्येन जीव-ब्रह्मणोरैक्यं प्रतिपाद्यते। सर्वज्ञत्वाल्पज्ञत्वादिभेदेन तयोरैकात्म्यम्। एकस्यैव तत्त्वस्य समष्टि-व्यष्टिरूपेण नामान्तरं ब्रह्मजीवात्मानौ इति। ब्रह्मसाक्षात्कारे द्वयोरैक्यस्यानुभूतेः तत् त्वमसि इति संगच्छते। अत्र भाग्यलक्षणाया जहदजहल्लक्षणया वा स्वीकरणाद् ब्रह्मजीवयोरैक्यत्वं साध्यते। सुरेश्वराचार्यो नैष्कर्म्यसिद्धौ एतदेव प्रतिपादयति—**सामानाधिकरण्यं च विशेषणविशेषता। लक्ष्यलक्षण-सम्बन्धः पदार्थप्रत्यगात्मनाम्**[16]**।।** एवं सुकरम् एतद् अभिधातुं यद् ब्रह्मसत्यं जगन्मिथ्या जीवो ब्रह्मैव नापरः।

*बुद्धचरिते* प्रथमसर्गे दृश्यते असितमुनिना शुद्धोदनं प्रति उक्तं यत् अयं नवजातो राजपुत्रः कालान्तरे बोधिलाभात् महापुरुषो भूत्वा अनित्यदुःखार्णवनिमग्नस्य जगतः परित्राता भविष्यति। एषां मोहाच्छन्नानां अनित्यसंसाराभिभूतानां पुत्रस्ते तत्त्वज्ञानद्वारा सन्मार्गदर्शको भविष्यति। तृतीयसर्गे जरा-व्याधि-मरण इति अवस्थात्रयेण स्पष्टतया वर्णितं जगदनित्यम्। चतुर्थसर्गे दृष्टमन्तःपुररमणीनां कामलीला सिद्धार्थहृदये आसक्तिं न जनयामास। पञ्चमसर्गे दृश्यते विषयविमुखः सिद्धार्थः शान्तिलाभार्थं गृहत्यागमकरोत्। इत्यत्र सर्वत्रापि सिद्धार्थमनित्य-जगद्विषयकं ज्ञानं शामयति। नवमसर्गे दृश्यते मन्त्रिपुरोहितौ कुमारान्वेषणार्थं भार्गवआश्रममागतौ। तदा ताभ्यां प्रति सिद्धार्थो निगदितं यद् अनित्ये जगति अहं न पुनर्गमिष्यामि, नित्यतत्त्वज्ञानद्वारा जन्मनिरोधः करिष्यामि। अत एव इत्यत्र वेदान्तदर्शनस्य नित्यानित्यज्ञानविषयकमालोचना प्राप्यते। सिद्धार्थेन उक्तं माया एव शोककारणं, संसारवन्धनकारणम्। मायावशात् जगदनित्यं मिथ्या इत्युच्यते। षष्टसर्गे सप्तदशश्लोकेन—**ध्रुवो यस्माच्च विश्लेषस्तस्मान् मोक्षाय मे मतिः। विप्रयोगः कथं न स्याद् भूयोऽपि स्वजनादिभिः।।**अष्टादशश्लोकेन—**शोकत्यागाय निष्क्रान्तं न मां शोचितुमर्हसि। शोकहेतुषु कामेषु सक्ताः शोच्यास्तु रागिणः।।**षष्टसर्गे छन्दकं प्रति सिद्धार्थेन अनित्य-जगद्विषये उपदेशं परिदिष्टम्।

वेदान्तदर्शने उक्तम्—**ब्रह्म सत्यम्** किं सत्यं किम् असत्यं मिथ्या वा, इति जिज्ञासायाम् आचार्यः श्रीशंकरोऽभिधत्ते यद्– यद् रूपेण यन्निश्चितं तद् रूपं न व्यभिचरति तत् सत्यम्। अर्थाद् यद् वस्तु शाश्वतिकं परिवर्तनरहितम् अविनश्वरं च तत् सत्यम्, अतोऽन्यद् असत्यं मिथ्या वा। एवं चिन्तनेन सिध्यति यद् जगद् असत्यं जगतः परिवर्तनशीलत्वात्। ब्रह्म च शाश्वतिकम् अपरिवर्तनशीलम्, अतः तस्य सत्यता न केनापि रूपेणाक्षेप्तुं शक्या। वेदान्तदर्शने ब्रह्म निर्विकल्पं निरुपाधि निर्विकारं चेति उररीक्रियते। तद् ब्रह्म द्विविधं निर्गुणं सगुणं च। निर्गुणं ब्रह्म परमार्थदृष्ट्या सच्चिदानन्दस्वरूपम्। तदेव जगतः प्रकाशकम्। तत्सत्त्यैव सूर्यचन्द्रादिकं प्रकाशते। अज्ञानोपाध्य-

वच्छिन्नं ब्रह्म सगुणरूपताम् आपद्यते। तदेव नामरूपादिभेदेन नानादेवतारुपताम् आसादयति। तस्य ब्रह्मणोऽविद्योपाध्यवच्छिन्नं कारणशरीरं समष्टिरूपेण ईश्वरः व्यष्टिरूपेण च प्राज्ञः जीवो वा मन्यते। तस्यैव ज्ञानेन सर्वं विज्ञायते। तदेव जगति ओतंप्रोतं च। ब्रह्मैकत्वज्ञाने च न मोहो न शोकः। न च तदन्यद् वस्त्वन्तरम्। एतदेव श्रुतिषु बहुधा प्रतिपाद्यते—**ईशावास्यमिदं सर्वम्**[17], **ऐतदात्म्यमिदं सर्वम्**[18], **यस्मिन् विज्ञाते सर्वं विज्ञातं भवति**[19], **स आत्मा तत्त्वमसि श्वेतकेतो**[20], **तत्र को मोहः कः शोक एकत्वमनुपश्यतः**[21], **मृत्योः स मृत्युमाप्नोति य इह नानेन पश्यति**[22]।

**जगन्मिथ्या** वेदान्तानुसारं जगन्मिथ्येति मन्यते। बह्व्यो विप्रतिपत्तयो वर्तन्ते। वेदान्तानुसारं मायायाः शक्तिद्वयम् आवरणविक्षेपनामकम्। आवरणशक्तिर्ब्रह्मणः शुद्ध-स्वरूपमावृणोति यथा मेघः प्रकाशस्मरूपं सवितारमावृतनोति तथा अज्ञानमपि ब्रह्म आच्छादयति एवम् आवृतत्वात् कुण्ठितप्रकाशे ब्रह्मणि अज्ञानं येन शक्त्यन्तरेण आकाशदि-प्रपञ्चं सृजति विक्षिपति सा शक्तिः विक्षेपशक्तिरिति उच्यते। यथा रज्जुज्ञानं रज्जुस्वरूपमावृत्य तत्रैव रज्ज्वां स्वशक्त्या सर्पमुद्भावयति सर्परूपेण परिणामते तथा अनादि अज्ञानमपि स्वाश्रयं ब्रह्मचैतन्यमाच्छाद्य तस्मिन् ब्रह्मण्येव जगद्रूपं रचयति। विशदीकृतं चैतद् दृग्दृश्यविवेके—**शक्तिद्वयं हि मायाया विक्षेपावृतिरूपकम्। विक्षेपशक्तिर्लिङ्गादिब्रह्माण्डान्तं जगत्सृजेत्**[23]**।।** मायायैव जगत् अविद्या-अज्ञान-अध्यास-अध्यारोप-विवर्तादिशब्दैर्व्यवह्रियते। अज्ञानोपाध्यवच्छिन्नं स्थूलं शरीरं व्यष्टिरूपं सद् विश्वं जगद् वा भवति। तत्त्वदृशा चिन्तनेन परिवर्तनशीलत्वाद् विनाशित्वाच्च जगद् मिथ्येत्युच्यते।

बुद्धचरिते द्वादशसर्गे अराडद्वारा सिद्धार्थं प्रति त्रिविंशतितमेन श्लोकेन उक्तम्—**अज्ञानं कर्म तृष्णा च ज्ञेयाः संसारहेतवः। स्थितोऽस्मिंस्त्रितये जन्तुस्तत्सत्त्वं नातिवर्तते।।** नवमसर्गे दृश्यते मन्त्रि-पुरोहितौ कुमारान्वेषणार्थं भार्गवाश्रममागतौ, ततःपरं कुमारसमीपे राज्ञः शुद्धोदनस्य पुत्रप्रेम, तथा पुत्र-विलापद्वारा शोकाकुलावस्थाया वर्णनं कृतौ। तदुत्तरेण सिद्धार्थेन उक्तम्—**पितुः सन्तापकारणं न पुत्रः, अज्ञानमेव...** अज्ञानं किं, वेदान्तदर्शनान्तर्गते वेदान्तसारे उक्तम्—**अज्ञानं तु सदसद्भ्याम् अनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किंचित् इति वदन्ति**[24]**।**

प्रथमसर्गे **विहाय राज्यं विषयेष्वनास्थस्तीव्रैः प्रयत्नैरधिगम्य तत्त्वम्। जगत्ययं मोहतमो निहन्तुं ज्वलिष्यति ज्ञानमयो हि सूर्यः।।** नवषष्टितमेन श्लोकेन परिलक्ष्यते उदगताश्रुम् ऋषिं दृष्ट्वा विशङ्कमानं शुद्धोदनं नृपतिमाश्वास्य असितमुनिराह वैराग्यमापन्नः कुमारोऽयं विषयवितृष्णो महता प्रयत्नेन तत्त्वान्वेषणं कुर्यात्। विहाय राजैश्वर्यं निरलसोऽयं, भूयसा यत्नेन तत्त्वसारां बहुकल्पदुर्लभं बोधिं लभेत। पुत्रस्ते ज्ञानसूर्य एव स्वप्रभया जगति मोहतमो विदारयितुमवतीर्णो ज्वलिष्यति। निरालोके जगति अयमेको मोहध्वान्तदिवाकरः समुत्पन्नः यस्य

ज्ञानप्रभया नूनमज्ञानतमोनाशः सम्भविष्यति। तादृशज्ञानलाभाधिकारी आसीत् सिद्धार्थः। वेदान्त-दर्शनस्य प्रकरणग्रन्थे वेदान्तसारे वेदान्तस्य अधिकारिलक्षणमुक्तम्—**अधिकारी तु विधिवत् अधितवेदवेदाङ्गत्वेन आपाततः अधिगताखिलवेदार्थः अस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्य-नैमित्तिक-प्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मष-तया नितान्तनिर्मलस्वान्तः साधनचतुष्टयः प्रमाता**[25]। अधिकारी साङ्गं वेदावृत्तिमवश्यं कुर्यात्। आवृत्तौ यथेच्चारो नैव कांक्ष्यते इति उच्यते विधिवदिति। शास्त्रानुसारं गुरोः सकाशे गुरूच्चारणानुच्चारणेन वेदावृत्तिः कर्तव्या। न चात्र अर्थज्ञानहीनभारवाहिरासभ इव केवलमादृत्तिः ईप्स्यते किंतु अर्थज्ञानमपि। अखिलवेदाररथज्ञस्य नायं वेदान्तसारग्रन्थः। अत एव उच्यते आपाततः अभिगताखिलवेदार्थः। ननु अनधीतवेदानां विदुरादीनां तत्त्वज्ञानोत्पत्तिदर्शनाद् वेदाध्ययनादिकं व्यर्थमिति चेदुच्यते अस्मिन् जन्मनि जन्मान्तरे वा। विदुरादिभिः अस्मिन् जन्मनि न वेदाः अधीताः, परंतु पूर्वजन्मसु अधीतम्। अतस्तस्य वेदपठनस्य संस्कारः अस्मिन् जन्मनि अपि वर्तते। वेदाध्ययनं कृत्वा तदर्थं च ज्ञात्वा गमनागमनसम्पादकत्वेन मोक्षपथप्रतिबन्धकत्वात् निषिद्धकर्मवत् काम्यकर्माणां वर्जनं नितरामेव कर्तव्यम्। ततः नित्यनैमित्तिकप्रायश्चित्तोपासनानाम् अनुष्ठानं विधेयं येन अस्माकं चित्तं समस्तपापनाशात् नितान्तं निर्मलं भवति। किं च न केवलम् एतदेव अधिकारी अवश्यं साधनचतुष्टयसम्पन्नो भवेत्। ननु किं नाम साधनचतुष्टयम् इति चेदुच्यते—नित्यानित्य-वस्तुविवेक-इहामुत्रफलभोगविराग-शमादिषट्कसम्पत्ति-मुमुक्षत्वानि इति। अतः नितान्तनिर्मल-स्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता एव अधिकारी।

**फलोद्देश्येन विधीयमानानि कर्माणि काम्यानि**[26] इत्युच्यते। यथा स्वर्गमाप्तुकामो जनो **ज्योतिष्टोमेन स्वर्गकामो यजेत**[27]इति विधिमनुसृत्य प्रवर्तेत। फलरूपेण तस्य स्वर्गप्राप्तिश्च घटते। नरकाद्यनिष्टसाधनानि ब्राह्मणहननादीनि निषिद्धकर्माणि उच्यते। शास्त्रकर्तृकप्रतिषिद्धानि कर्माण्येव निषिद्धकर्माणि। निषिद्धकर्मानुष्ठानफलं च नरकादिदुःखमयलोकप्राप्तिः। अत्र ज्ञातव्यमस्ति यत् काम्यकर्मणां शुभकर्मत्वेऽपि तत्फलभोगार्थं जन्ममरणहेतुतया मोक्षावरोधकत्वेन निषिद्धकर्मवत् तेषामपि ब्रह्मविद्याधिकारित्वे प्रतिबन्धकत्वम्। नित्याकर्मणामाचरणे पुण्यादिकं नोत्पद्यते परंतु अकरणे प्रत्यवायो ध्रुवः। श्रुतौ प्रत्यहं सन्ध्योपासनयाः कर्तव्यता विहिता। सन्ध्योपासना करणे न किमपि भवति, आलस्यादिवशाद् अकरणे मानवः पापभाग् भवति। कालतो यथा वृक्षः फलवान् भवति, तथा कर्मजन्यमदृष्टं कालापेक्षायां विद्यते। नित्यकर्म सञ्चितकर्मविनाशद्वारा सार्थकम्। स्मृतौ उक्तम्—**अकुर्वन् विहितं कर्म निन्दितं च समाचरन्। प्रसञ्जन् च इन्द्रियार्थेषु नरः पतनम् ऋच्छति**[28]।।

नैमित्तिककर्म अपि नित्यकर्मवत् सञ्चितकर्म दूरीकरोति। नित्यकर्म निर्णिमित्तकम्, नैमित्तिककर्म तु सनिमित्तकम्। यथा– जातेष्टिः। यदि पुत्रो जायते, तर्हि इष्टियागः करणीयः। प्रायश्चित्तशब्दस्यार्थः प्रायः तुष्टं चित्तं यत्र तत् प्रायश्चित्तम्। प्र प्रकृष्टम् अयः लौहवत् कठोरतपः। यस्मिन् कर्मणि कठोरतपोद्वारा चित्ततुष्टिर्भवति तत् प्रायश्चित्तम्। यथा चान्द्रायणव्रतः। कृतप्रायश्चित्त प्रसन्नचित्त व्यक्तिः चित्तैकाग्र्यसम्पादनार्थम् उपासनां करिष्यति। उप-समीपे आस्यते स्थीयते अनेन-- इति व्युत्पत्त्या यद्द्वारा उपासक उपास्यसमीपं तिष्ठति । सगुणब्रह्मविषयक मानसव्यापारम् उपासना। वेदान्तसारे—**काम्यानि स्वर्गादीष्टसाधनानि ज्योतिष्टोमादीनि, निषिद्धानि नरकाद्यनिष्ट-साधनानि ब्रह्महननादीनि, नित्यानि अकरणे प्रत्यव्ययसाधनानि सन्द्ध्यावन्दनानि। नैमित्तिकानि पुत्रजन्माद्यनुवन्धीनि जातेष्ट्यादीनि। प्रायश्चित्तानि पापक्षयमात्रसाधनानि चान्द्रायणादीनि। उपासनानि सगुणब्रह्मविषयक मानसव्यापाररूपाणि शाण्डिल्य-विद्यादीनि**[29]।।

पुनश्च नित्यनैमित्तिकप्रायश्चित्तोपासनानां चतूर्णां कर्मणां फलं मुख्यावान्तरभेदेन द्विविधम्। तथाहि नित्यनैमित्तिकप्रायश्चित्तानां बुद्धिशुद्धिर्हि परं प्रयोजनम्। उपासनायाश्च मुख्यं प्रयोजनम् चित्तैकाग्र्यम्। एतद्विषये श्रुतिप्रमाणम्– **तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन**[30] इति। स्मृतिप्रमाणमपि उपलभ्यते– **तपसा कल्मषं हन्ति**[31]इति। एतेषां नित्यनैमित्तिक-प्रायश्चित्तानाम् अवान्तरं फलं नाम मुख्यफलातिरिक्तं गौणफलमपि भवति, यस्मात् पितृलोकस्य सत्यलोकस्य च प्राप्तिर्भवति।। अतः नित्यनैमित्तिक-प्रायश्चित्तानाम् अवान्तरं फलं पितृलोकप्राप्तिः, उपासनायाश्च अवान्तरं फलं सत्यलोक-प्राप्तिरित्यर्थः। यथा भगवती श्रुतिर्वदति– **कर्मणा पितृलोको विद्यया देवलोकः**[32] इति।

*********

आकरनिर्देशः

[1]मा.उप. १.१.६

[2]तदेव १.१.७

[3]पञ्चदशी पञ्चभूतविवेकप्रकरणम् २०

[4]तै.उप. भाष्यवार्तिकः ब्रह्मवल्ली १३१

[5]तै.उप. २.१.१

[6]बृ.उप. ४.३.९

[7]क.उप. ४.१५

[8]बृ.उप. ४.४.१६

[9]छा.उप. ६.१२.२

[10]बृ.उप. ३.९.२८

[11]तै.उप. ३.६.१

[12]तदेव २.७.१

[13]बृ.उप. ४.४.१९

[14]तै.उ. ३.१.३

[15]वे.सा. १

[16]नै.सि. ३.३

[17]ई.उप. १

[18]छा.उप. ६.८.७

[19]मु.उप. १.३

[20]छा.उप. ६.८.७

[21]ई.उप. ७

[22]क.उप. २.१.१०

[23]दृग्दृश्यविवेकः १३

[24]वे.सा. २२

[25]वे.सा. ६

[26]विद्वन्मनोरञ्जनी

[27]आपस्तम्भश्रौतसूत्रम् १०२.१

[28]मनु. ११.४४

[29]वे.सा. ७

[30]बृ.उप. ४.४.२२

[31]मनु. १२.१०४

[32]बृ.उप. १.५.१६

## *बुद्धचरिते* न्याय-वैशेषिकदर्शनविमर्शः

*बुद्धचरिते* प्रथमसर्गे **मोक्षाय चेद्वा वनमेव गच्छेत् तत्त्वेन सम्यक् स विजित्य कृत्स्नम्। मतं पृथिव्यां बहुमानमेतो राजेत शैलेषु यथा सुमेरुः।।** षट्त्रिंशत्तमेन श्लोकेन असितमुनिः शिशुं सिद्धार्थं दृष्ट्वा उक्तं राजानं शुद्धोदनं प्रति यत् स बालकः सिद्धार्थः मोक्षाय वनमेव गच्छेत् तत्त्वेन कृत्स्नं मतं सम्यक् विजित्य च पृथिव्यां बहुमानं भवेत् यथा शैलेषु सुमेरुः राजेत। इत्यत्र **मोक्षाय तत्त्वेन** च इति पदद्वयं प्राप्यते। न्याय-वैशेषिकदर्शनं समानतन्त्रदर्शनम्। वैशेषिकदर्शनं कणादमहर्षिणा समारब्धं आस्तिकदर्शनं च। विशेषपदार्थस्वीकारमूलकत्वात् अस्य दर्शनस्य वैशेषिकम् इति नामकरणम्। अस्मिन् वैशेषिकदर्शने **धर्मविशेषप्रसूतात् द्रव्य-गुण-कर्म-सामान्य-विशेष-समवायानां पदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निश्रेयसम्**[1] निश्रयसमस्य शास्त्रस्य मुख्यं प्रतिपाद्यम्। परमात्मा तु जीवात्मनो भिन्न एव। स हि—सर्वज्ञः, विभुः, शुद्धमुक्तस्वभावः। जीवात्मा पुनः सुखदुःखानुभवापेतो जन्ममरणादिजालपतितः। अनादिवासनया देहमेवात्मानं मन्यमानो जीवो विषयेषु रज्यते तत्र प्रवर्तते। प्रवर्तमानः शुभाशुभकर्मणि संचिन्त्य सुखदुःखे अनुभवति। तत्त्वज्ञानेन मिथ्यावासनायां निवर्तितायां रागाभावात् प्रवृत्यभावे कर्माभावात् सुखदुःखापगमः। स एव मोक्ष इति शास्त्रस्यास्य तत्त्वम् इति।

गौतममहर्षिणा प्रणीतमिदं न्यायदर्शनम्। गौतममहर्षि-प्रणीतसूत्राणां वात्सायनेन भाष्यं विरचितम्। गङ्गेशोपाध्यायः तत्त्वचिन्तामणिनामकं ग्रन्थं रचयित्वा नव्यन्यायप्रवर्तकोऽभूत्। न्यायसूत्रस्य प्रथमाध्याये प्रथमाह्निके सूत्रकारेण गौतमेन **प्रमाण-प्रमेय-संशय-प्रयोजन-दृष्टान्त-सिद्धान्त-अवयव-तर्क-निर्णय-वाद-जल्प-वितण्डा-हेत्वाभास-च्छल-जाति-निग्रह-स्थानानां तत्त्वज्ञाना-न्निःश्रेयसाधिगमः**[2]इत्यनेन षोडशपदार्थाः अङ्गीकृताः। **प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि**[3] इति सूत्रेण प्रत्यक्ष अनुमान उपमान शब्दं चेति प्रमाणचतुष्टयं प्रतिपादितम्। प्रमीयते अनेनेति प्रमाणम्, यथार्थज्ञानं प्रमा, तत्वति तत्प्रकारकोऽनुभवो यथार्थः। अयं घटः इत्यत्र घटत्ववति घटत्वप्रकारकः ज्ञानमेव यथार्थः। यथार्थज्ञानगतधर्मः प्रमा, यथार्थानुभवनिष्ठधर्म एव प्रमा। नवीनास्तु वैशेषिकोक्तषट्पदार्थान् अभावान् च अधिकपदार्थतया अङ्गीकृत्य गौतममहर्षिप्रणीत षोडश-पदार्थान् एतेषु पदार्थेषु अन्तर्भाव्य सप्तैव पदार्था इति उक्तवन्तः पदार्थ तत्त्वज्ञानात् निश्रेयसाधिगमः तेषां राद्धान्तः। सुखदुःखात्मकमनोवृत्तिनाशे जाते मनस्साम्यावस्थां प्राप्नोति। तदा यत्र न सुखं नापि दुःखं तिष्ठति सैव मुक्तिः। नैयायिकैर्दुःखध्वंसो मोक्षत्वेनाभिमतः। तदुक्तं गौतमेन—**दुःख-जन्म-प्रवृत्ति-दोष-मिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः**[4] इति सूत्रेण दुःखध्वंसस्यैव मोक्षत्वम्। अपायशब्दः ध्वंसात्मकः। आद्यन्तशरीरसंयोगो जन्म, तस्य नाशे दुःखनाशः।

कारणनाशात् कार्यनाश इति मतेन जन्मनो नाशे दुःखस्यापि नाशः। जन्म दुःस्यासमवायिकारणम्। एवमेव गौतमोक्तसूत्रस्यापि दुःखध्वंसात्सकमुक्तिप्रतिपादनमेव प्रवृत्तिरिति न कापि हानिः। तत्त्वज्ञानद्वारा कथं प्रकारेण मुक्तिर्भवति तदुक्तं न्यायभाष्यकारेण वात्सायनेनेति—**यदा तत्त्वज्ञानात् मिथ्याज्ञानमपैति, तदा मिथ्याज्ञानापाये दोषा अपयन्ति, दोषापाये प्रवृत्तिरपैति, प्रवृत्त्यपाये जन्म अपैति, जन्मापाये दुःखमपैति, दुःखापाये च आत्यन्तिकापवर्गो निश्रेयसमिति**[5] **।**

*बुद्धचरिते* द्वितीयसर्गे **निःश्रेयसं तु तस्य तु भव्यमर्थं श्रुत्वा पुरस्तादसितान्महर्षेः। कामेषु सङ्गं जनयां बभूव वनानि यायादिति शक्यराज॥** पञ्चविंशतिततमेन श्लोकेन राज्ञः शुद्धोदनस्य बुद्धिः कर्त्री पुरस्तात् पूर्वे महर्षेरसितात् तस्य बुद्धस्य भव्यं भाविनमित्यर्थः। नैःश्रेयसं निश्रेयसस्य मोक्षस्यायं नैःश्रेयसस्तं मोक्षसंबन्धिनमर्थं विषयं श्रुत्वा राज्ञः शुद्धोदनस्य सिद्धार्थं प्रति कामेषु विषयेषु सङ्गमासक्तिं जननार्थं वृथा चेष्टा परवर्तिना कतिपयेन श्लोकेन अपरिलक्ष्यत। **निःश्रेयसः** कः? कणादमुनिना रचितस्य वैशेषिकसूत्रोपरि पण्डितशङ्करमिश्रेण वैशेषिकसूत्रोपस्कारटीका विरचिता। आत्मतत्त्वसाक्षात्कारस्य पदार्थतत्त्वज्ञानमेव मार्गः यः निवृत्तिलक्षणधर्मद्वारा प्राप्यते। उक्तम्--- **यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः**[6] इति। अभ्युदयपदस्यार्थः तत्त्वज्ञानम्। निःश्रेयसमित्यत्र निश्चितः श्रेयः। निश्चितश्रेयपदार्थ एव मुक्तिः। न्यायवैशेषिकदर्शने मुक्तिः दुःखस्यात्यन्ताभावः। अत उपस्कारेणोक्तं निःश्रेयसं दुःखनिवृत्तिः। अभ्युदयश्च निःश्रेयसश्च इति विग्रहे अभ्युदयनिःश्रेयसे, तयोः सिद्धिः अभ्युदयनिःश्रेयससिद्धिः। अत एव यस्मात् पदार्थाद् अभ्युदयसिद्धिः निश्रेयससिद्धिः च भवति स पदार्थ एव धर्मः। तत्त्वज्ञानस्य हेतुस्वरूपो निवृत्तिलक्षणधर्म एव वैराग्यरूपधर्मः। स हि तत्त्वज्ञानजनकः। परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायात् नाप्यकृतः कृतेन। तद्विज्ञानार्थं स गुरूमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्। तस्मै स विद्वानुपसन्नाय सम्यक् प्रशान्तचित्ताय शमान्विताय। येनाक्षरं पुरुषं वेदः सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्यामित्यिश्रुतेः। निदिध्यासनादियोगोऽपि वैराग्यप्रकर्षं साधयेत्, परं मुक्तिर्भवति। श्रोतव्य-मन्त्रव्य-निदिध्यासितव्य इति विधिप्रत्ययवती श्रुतिद्वारा निदिध्यासनजन्यमदृष्टं ज्ञाप्यत इत्याशयः। विधिरूपो भावरूपः। प्रवृत्तिलक्षणोऽपि वर्णाश्रमानुद्दिश्य विहितो धर्म ईश्वरार्पणबुद्ध्या अनुष्ठीयमानः क्रमेण निश्रेयसायोपयुज्यत इति तस्यापि ग्रहणं यद्वा निवृत्तिलक्षणः कर्मसन्न्यासजन्यः सर्वकर्मफल-त्यागजन्यो वा अदृष्टविशेषः। निदिध्यासनादियोगात् प्रज्ञा प्रज्ञायाः संस्कारः स चात्मसाक्षात्कारम् उपपादयन् कैवल्यमाधत्ते।

उपस्कारे उक्तम् अभ्युदयः सुखं, निश्रेयसं च मुक्तिः। अत एव यद्द्वारा सुखलाभो भवति तद्दारा मुक्तिरपि भवति, तदुभयं धर्मः। एककालीनः सकलानाम् आत्मविशेषगुणानां ध्वंस एव मुक्तेः

स्वरूपम्। तथा च यत्काले यदात्मनः सविशेषगुणानां ध्वंसो भवति तत्काले तस्य निश्रेयसमिति भावः। तथा च कालान्तरीनः तद्ध्वंसकूटवत्त्वमादाय संसारिदशायां निश्रेयसवत्त्वव्यवहारवारणाय एककालीन इति। कतिपयात्मविशेषगुणध्वंसस्य संसारिदशायामपि सत्त्वादतिव्याप्तिवारणाय सकलपदम्। भूत-भौतिक-सत्त्वदशायां संसार-व्यतिरिक्तसत्तवदशायां वामदेवादीनां निश्रेयसेऽतिव्याप्तिवारणाय आत्मेति पदं तदात्मपरम्। महाप्रलयादन्यत्र मुक्तात्मनेऽपि सामान्य-गुणवत्त्वे सति सकलतदात्मगुणध्वंसस्य अप्रसिद्धत्वात् तदानीं निश्रेयसव्यवहारो न स्यात् इति विशेषगुण इति।

वस्तुतः सकलादृष्टध्वंसे दुःखोपशमो भवति परन्तु ये अदृष्टं न स्वीकुर्वन्ति तेषां नये असम्भव-दोषदुष्टत्वात् विशेषगुणध्वंसः इति। यतः चरमादृष्टध्वंसोत्पत्तिक्षणे चरमदुःख-विनश्यदवस्थायां विद्यते, न च सकलतदात्मदुःखध्वंस एव निश्रेयसम्, चरमदुःखध्वंसकालेऽपि चरमतत्त्वज्ञान-तदनुव्यवसायत्वे निःश्रेयसव्यवहारस्य तेऽनङ्गीकारात्। अत सकलविशेषगुणध्वंस एव निःश्रेयसम्।

सप्तमसर्गे अष्टचत्वारिंशत्तमेन श्लोकेन—**स्वर्गीय युष्माकमयं तु धर्मो ममाभिलाष-स्त्वपुनर्भवाय। अस्मिन्वने येन न मे विवत्सा भिन्नः प्रवृत्या हि निवृत्तिधर्मः**। यदा सिद्धार्थः तपोवनं प्राविशत्, तदा स्वर्गकामाः तपस्विनः यागयज्ञानां प्रशंसा सिद्धार्थसमीपे अकुर्वन् परंतु सिद्धार्थो न स्वर्गाभिलाषी, पुन्जन्मनियन्त्रणार्थं स केवलं मोक्षाभिलाषी, यतोऽभ्युदयसिद्धिर्यतश्च निःश्रेयससिद्धिस्तदुभयं धर्मः। अत्र अभ्युदय इत्यत्र स्वर्गः, निःश्रेयसमिति अपवर्गः। किं पुरुषार्थः? अन्येच्छानधीनेच्छाविषयत्वमेव परमपुरुषार्थः। स्वर्गः तथा अपवर्ग एव परमपुरुषार्थः। अभ्युदयः सुखात्मकम्, निश्रेयसमिति दुःखाभावात्मकम् इति।

सुखार्थिव्यक्तिगणानां दुःखाभावार्थं प्रवृत्तिः। शोकाकुला मानवाः ये सुखविमुखाः तेषां दुःखाभावमात्रं लक्ष्यीकृत्य विषभक्षणादिप्रवृत्तिर्दृश्यन्ते।श्रुति-अनुमान-प्रमाणबलेन दुःखनिवृत्तिरूपेण मोक्षज्ञातत्वाद् ज्ञाने अविषयतारूपमवेद्यत्वमनुपपन्नम्। यतः **तमेव विदित्वा अतिमृत्युमेति**[7] इति। अनुमानमपि अस्ति—दुःखसन्ततिरत्यन्तमुच्छिद्यते सन्ततित्वात् प्रदीप-सन्ततिवत्। चरमदुःख-निवृत्तिः दुःखसाक्षात्कारस्य कारणजन्यसाक्षात्कारेण क्षणमात्रविषयरूपेण भासितत्त्वात् प्रत्यक्ष-वेद्यता अस्ति। योगजपुरुषाणां योगजन्यधर्मबलेन आगामिदुःखनिवृत्तिः प्रत्यक्षविषयो भवति। सुख-दुःखयोः आयव्ययतुल्यत्वे दुःखध्वंसो न पुरुषार्थः। सामान्येन रागरहितो विरक्तः पुरुषो यो दुःखरूपमेघाच्छन्नदिनभयाद् भीतः, अस्थायिसुखे लेशमात्रमिच्छा नास्ति, तस्य पुरुषस्य मोक्षे प्रवृत्तिः सम्भवपरा, वासनायुक्तमिथ्याज्ञानं संसारहेतुः, तदुच्छेदेन आत्मज्ञानम्। आत्मज्ञानस्य योगवृत्तिसाध्यत्वात् तज्जन्यं प्रवृत्तिर्दृश्यते। निरुपप्लवा चित्तसन्ततिर्मुक्तिरिति न। यदि विज्ञानसन्तति-धारायाः अनुवृत्तिः स्वीकृता तदपि शरीरसाध्यत्वात् संसारानिवृत्तिः अवश्यम्भाविनी। अत एव

दुःखनिवृत्तिरूपम् एव मुक्तिः। द्वादशसर्गे अराडमुनिना  सिद्धार्थं प्रति उक्तम्—**विदितं मे यथा सोम्य निष्क्रन्तो भवनादसि। छित्वा स्नेहमयं पाशं पाशं दृप्त इव द्विपः।। सर्वथा धृतिमच्चैव प्राज्ञं चैव मनस्तव। यस्त्वं प्राप्तः श्रियं त्यक्त्वा लतां विषफलामिव।। इदं मे मतमाश्चर्यं नवे वयसि यद्भवान्। अभूक्त्वैव श्रियं प्राप्तः स्थितो विषयगोचरे।।** अपि च **तद् विज्ञातुमिमं धर्मं परमं भाजनं भवान्। ज्ञानप्लवमधिष्ठाय शीघ्रं दुःखार्णवं तर।।** हे सिद्धार्थ, ध्यैर्यप्रतिमूर्तिः, प्राज्ञो, त्वमेव उपयुक्तः पात्रो दुःखार्णवजगतः परित्रातुम्। यः त्वं सांसारिकभोगसुखे विरक्तो भूत्वा मोक्षलाभाय प्रयासी।

********

आकरनिर्देशः

---

[1]वै.सू. १.१.४

[2]न्या.सू. १.१.१

[3]तदेव १.१.३

[4]तदेव १.१.२

[5]न्या.भा. १.१.२

[6]वै.सू.उ. १.१.१

[7]श्वे.उप. ६.१.१५

## *बुद्धचरिते* सांख्यदर्शनविमर्शः

*बुद्धचरिते* द्वादशतमे सर्गे दृश्यते सिद्धार्थो वैराग्यवशात् मोक्षलाभेच्छया अराड्मुनेराश्रमं प्रविष्टवान्। तत्र सिद्धार्थः अराड्सकाशे जरा-मरण-रोगेभ्यो कथं परिमुच्यते इति जिज्ञासितवान्। तदा अराड्मुनिः सांख्यदर्शनसम्बलितं मोक्षोपायं सिद्धार्थसमीपे उक्तवान्। भारतीयदर्शनेषु सांख्यदर्शनम् अन्यतमम्। सांख्यदर्शनं प्राचीनतमं दर्शनम् । सांख्यदर्शनस्य प्रवक्ता कपिलमुनिः। पञ्चविंशति-तत्त्वानां सम्यक्चर्चा यस्मिन् शास्त्रे क्रियते, तच्छास्त्रं सांख्यशास्त्रम् इति आख्यातम्। न्याय-वैशेषिकदर्शने यथा पदार्थतत्त्वज्ञानद्वारा वैराग्यप्राप्तिः, तद्वैराग्यपरम्पराय च आत्यन्तिक-मुक्तिः ज्ञापिता तथैव सांख्यदर्शने चतुर्विंशतितत्त्वज्ञानद्वारा विवेकख्यातेरुदयः अनन्तरं वैराग्यस्यागमनम्, क्रमेण साधनाभिलाषैकतानताय आगतवैराग्यं परवैराग्ये उन्नीतम्, परवैराग्यात् आत्यन्तिकी मुक्तिः। मुक्तिरेव स्व-स्वरूप-साक्षात्कारः। अस्य साक्षात्कारस्य नामान्तरं दर्शनम्।

*बुद्धचरिते* तृतीयसर्गे तथा षष्ठसर्गे दुःखपरिणामो दृष्टः। संवेगोत्पत्तिः इति तृतीयसर्गे यत् अवस्थात्रितयं वर्णितम्, तदालोक्य सिद्धार्थहृदये वैराग्यमुदितम्। तत्र प्रथमकारणं जरा, द्वितीयकारणं रोगः, तृतीयकारणं मृत्युः च। षष्ठसर्गे स्वजनवियोगो ध्रुवः, शोकः आसक्तेः परिणतिः इत्यादि दुःखमयजगद्विषयकालोचना प्राप्यते। दुःखं खलु प्रत्यात्मवेदनीयम् प्रतिकूलवेदनीयं च। सांख्यकारिकायां प्रथमकारिकायां दुःखं किं, कथं दुःखविषये जिज्ञासा इत्यालोचना प्राप्यते— त्रिविधैः आध्यात्मिक-आधिभौतिक-आधिदैविकैः कृत-आघातकारणात् तद् विनाशकोपायविषये जिज्ञासा समुत्पद्यते। यदि प्रत्यक्षगोचरोपायैः उक्तदुःखानां निवृत्तिः सरलतया भवितुं शक्या, एवं केनापि कथ्यते तथा फलतः उक्त जिज्ञासा वृथैव इति कथनं समीचीनं नास्ति यतोहि ऐकान्तिकरूपेण, एवम् अनिवार्यतः आत्यन्तिकरूपेण अथवा पूर्णतः अन्तिमरूपेण दुःखनिवृत्तिर्न सम्भवति। कारिकेयम्—**दुःख-त्रयाभिघाताज्जिज्ञासा तदवघातके हेतौ। दृष्टे साऽपार्था चेन्नैकान्तात्यन्ततोऽभावात्**[1]।।

भारतीय परम्परानुसारेण अनेकप्रकाराणि दुःखानि त्रिषु वर्गेषु विभज्यन्ते-- आध्यात्मिकम्, भौतिकम्, दैविकम् च। एतत् त्रिविधदुःखानां निर्देशो दुःखमयशब्दद्वारा सिद्धः कृतः। आध्यात्मिक-शब्दस्य अर्थः मनुष्यस्य आन्तरिक-शारीरिक-मानसिक कारणेभ्यः उत्पन्नदुःखानि। आध्यात्मिकं दुःखं द्विधा शारीरिकं मानसिकं च। सांख्यतत्त्वकौमुद्यामुक्तं—**शारीरं वातपित्तश्लेष्मणां वैषम्यनिमित्तम्। मानसं कामक्रोधलोभमोहभयेर्षाविषादविषयविशेषादर्शन-निबन्धनम्। सर्वं चैतदान्तरोपायसाध्यत्वादाध्यात्मिकं दुःखम्**[2]।। अध्यात्म+ष्णिक् प्रत्ययेन आध्यात्मिकम्,

आत्मानम् अधिकृत्य अध्यात्मम्। अधिभूत + ष्णिक् प्रत्ययेन आधिभौतिकम्, भूतसमूहम् अधिकृत्य। भौतिक दुःखं तदस्ति यत्प्राणिभिः मनुष्य-पशु-आदिभिः एवं स्थावरपदार्थैः वृक्ष-पर्वतादिकारणेन सम्प्राप्यते। अधिदेव + ष्णिक् प्रत्ययेन आधिदैविकम्, देवताम् अधिकृत्य। दैविकानि दुःखानि देव-यक्ष-राक्षस-भूतप्रेत-प्रकोपकारणाद् उद्भवन्ति। उक्तं च—**बाह्योपायोपाय-साध्यं दुःखं द्वेधा,—आधिभौतिकम्, आधिदैविकं च। तत्राधिभौतिकं मानुषपशुमृगपक्षि-सरीसृपस्थावरनिमित्तम्। आधिदैविकं तु यक्षराक्षसविनायक-ग्रहाद्यावेशनिबन्धनम्**[3]।

यद्यपि एतेषां दुःखानां विनाशः पूर्णरूपेण न भवति, परंतु तानि अभिभवितुं शक्यन्ते। प्रत्यक्षगोचर-उपायैः दुःखानां निवृत्तिः ऐकान्तिकरूपेण अर्थात् अनिवार्यतः, आत्यन्तिकरूपेण अर्थात् पूर्णतः भवितुं न शक्यते यथा केनापि विशिष्टेन औषधेन कोऽपि विशिष्टः रोगः अनिवार्यतः नष्टो न भवति अन्ततश्च नष्टः सन् रोगः पुनरपि उत्पद्यते अतः ऐकान्तिकरूपेण आत्यन्तिकरूपेण च दुःखनिवृत्तेरुपायस्य जिज्ञासा विफला नास्ति फलतश्च एतत् समाधानार्थं शास्त्रस्य क्षरणमावश्यकमस्ति। सांख्यतत्त्वकौमुद्यां—**एकान्त-दुःखनिवृत्तेरवश्यम्भावः, अत्यन्तृनिवृत्तस्य दुःखस्य पुनरनुत्पादः**[4]।

श्रुतौ वेदेषु विहित-यज्ञानुष्ठानाद्यपायेऽपि दुःखानामैकान्तिकरूपेण एवम् आत्यन्तिकरूपेण निवृत्तिः न भवति, यतो हि वेद-विहित-यज्ञाद्युपायाः अशुद्धि-क्षय- अतिशयदोषैः युक्ताः सन्ति। एतद् विपरीतम् अशुद्धि-क्षय-अतिशयदोषमुक्तः उपायः, यः व्यक्त–अव्यक्त तत्त्वज्ञानेन तथा पुरुषविज्ञानेन सिद्ध्यति, श्रेयान् अर्थात् अत्युत्तमः यत इदमेव दुःखानामैकान्तिक-आत्यन्तिकरूपेण निवृत्यर्थम् एकमात्रं साधनमस्ति।

*बुद्धचरिते* द्वादशतमे सर्गे सप्तदशश्लोकेन अराडमुनिना उक्तम्... **प्रकृतिश्च विकारश्च जन्ममृत्युरैर्जव च। तत्तावत् सत्त्वमित्युक्तं स्थिरसत्त्व परेहि तत्॥** इत्यत्र प्रकृतिः विषये आलोचना दृश्यते, प्रकृति-विकारजन्यो मृत्युः तथा जरा प्रकृतेः सत्त्वम् इत्युक्तम्। अपि च **तत्र तु प्रकृतिं नाम विद्धि प्रकृतिकोविदः। पञ्चभूतान्यहंकारं बुद्धिमव्यक्तमेव॥** अष्टादशश्लोकेन अराडमुनेः वक्तव्यम्- हे सिद्धार्थ, पञ्चभूतानि (क्षिति-अप-तेज-मरुद्-व्योम),अहंकारः, बुद्धिः, अव्यक्तं च एतानि प्रकृति इति आख्यायते। ऊनविंशतितमेन श्लोकेन विकारविषये उक्तम्...**विकार इति वुध्यस्व विषयानिन्द्रियाणि च। पाणिपादं च वादं च पायूपस्थं तथा मनः॥** विषयाः (रूप-रस-शब्द-स्पर्श-गन्धाख्यानि),इन्द्रियाणि (चक्षु-कर्ण-नासिका-जिह्वा-त्वगाख्यानि), करचरणं, कण्ठस्वरं, पायुः, उपस्थम्, मनः च एतानि विकारशब्देनोच्यते। सांख्यदर्शने अव्यक्तप्रकृतेः तथा महत्-अहंकार-पञ्चतन्मात्रादिप्रकृतिविकृतीनां तथा षोडशविकृतीनामालोचना प्राप्यते। सांख्यदर्शने

मूलप्रकृतिरविकृतिः। प्रकरोतीति प्रकृतिः प्रधानम्, सत्त्वरजस्तमसां साम्यावस्था प्रकृतिः। मूलश्चासौ प्रकृतिश्चेति मूलप्रकृतिः। विश्वस्य कार्यसंघातस्य सा मूलम् , न तस्या मूलान्तरमस्ति। सत्त्वरजतमसां साम्यावस्था प्रकृतिः, सत्त्वरजतमांसि इति गुणत्रयं साम्यावस्थायां विद्यमानायां प्रकृतिपदवाच्यं भवति। गुणत्रयाणां किंचित्त्वैषम्येण प्रकृतिपदवाच्यं न भवति। सत्त्व-रजस्-तमस्-एतत्त्रयो गुणाः मूलरूपेण अव्यक्ता भवन्ति अतः एतेषां समष्टिः अव्यक्ताऽस्ति, यद्यपि गुणत्रये एवं तत् गुणत्रयस्य समष्टिरूपव्यक्ते कोऽपि अन्तरो नास्ति यतो एते गुणाः अव्यक्तस्य धर्माः न सन्ति अपि तु अव्यक्तस्वरूपस्य संघटका भवन्ति। इत्थं सांख्याभिमतमव्यक्तं त्रिगुणात्मकमस्ति, तस्य च विकसितं रूपं व्यक्तमपि स्वभावतः त्रिगुणं गुणत्रयेण युक्तमस्ति।

*बुद्धचरिते* त्रिविंशतितमेन श्लोकेन—**अज्ञानं कर्म तृष्णा च ज्ञेयाः संसारहेतवः। स्थितोऽस्मिंस्त्रितये जन्तुस्तत्सत्त्वं नातिवर्तते**।। कथं सत्त्वं न अतिक्राम्यते तद्विषये कारण-त्रयमुक्तम्, अज्ञानं, कर्म, तृष्णा च। सत्त्वरजतमांसि गुणत्रयं यदा साम्यावस्थायां विद्यमानं भवति तदा प्रकृतिपदवाच्यं भवति, किंचिद् वैषम्यात् न प्रकृतिपदवाच्यम्। त्रयो गुणाः सत्त्वरजतमांसि क्रमशः सुखदुःखमोहात्मकाः सन्ति। एतत् त्रयस्य प्रयोजनं प्रकाशक-प्रवर्तन-नियमार्थाः। परस्परं नियमनं वा अभिभवं कुर्वन्ति, एको गुणोऽन्यमभिभूय वर्तते। एते परस्परं जनकाः, परस्परम् आश्रयिणः, उद्भवाभिर्भावकर्तारः एवं सम्भूय तथा परस्परं सम्मेल्य कार्यकरणस्य वृत्तिं धारयन्ति। प्रीति-अप्रीति-विषादाः सत्त्वादिगुणानां स्वरूपं प्रकटयन्ति। उक्तमेव—**प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्ति-नियमार्थाः। अन्योऽन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः**[5]। सत्त्वगुणः लघुत्वगुणवान् फलतः प्रकाशको भवति अर्थात् इन्द्रियार्थसन्निकर्षे सति अवभासकः। रजोगुणः उत्तेजकः क्रियाशीलः प्रेरकश्च भवति। रजोगुण उपष्टम्भकं संश्लेषकजनकं, चलं सक्रियं च भवति। तमो गुरु गुरुत्ववत् वरणकम् आच्छादकं भवति। तमोगुणः इन्द्रियाणि क्रियाभ्यः अवरूण्धि इत्थम् इन्द्रियव्यापारनिवृत्तिकारणात् तत्तत्कार्यप्रतिबन्धकद्वारा अवरोधक उच्यते। उक्तमेव –**सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलञ्च रजः। गुरुवरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः**[6]। त्रिगुणाः परस्परं विरुद्धस्वभावविशिष्टाः तथापि कथमेतेषां परस्परजननमिथुनवृत्तिः सिद्ध्येद् इत्युच्यते- **प्रदीपवच्चार्थतो वृत्तिः**। न हि कार्योत्पादनकाले गुणत्रयं स्वतन्त्रतया स्वस्वभावं शक्तिं स्वस्वत्तां वा प्रकाशयति, भोक्तुरदृष्टस्य प्रभावेनैव ते परस्परं विरुद्धस्वभावं परित्यज्य एकक्रियासम्पादनं कुर्वन्ति। यथा तुलानिर्मितवर्तिरग्निना नश्यते, तैलं चाग्निना लयमेति, क्वचित्प्रदीपशिखासु तैलक्षेपोऽग्निः निर्वपति, परंतु परस्पर-विरुद्धास्ते तैलवर्त्यग्नयः मिलिताः सन्तः रूपं प्रकाशयन्ति। गुणत्रयं परस्परं विरुद्धस्वभावान्वितमपि त्रयं सम्मेल्य पुरुषस्य भोगसाधनं भवति अपि वा मुक्तिसाधनमपि। अर्थतः अर्थात् पुरुषस्य भोगापवर्गसाधनार्थं कार्यमुत्पादयति ।

सांख्यदर्शनेपुरुषः आत्मतत्त्वस्य वाचकः शब्दः। ऐकान्तिकात्यन्तिक-दुःखनिवृत्तिरेव परम-काम्यम्। तदर्थम् एकमात्रसाधनं सत्त्वपुरुषान्यताप्रत्ययः। तत्प्रत्ययलाभार्थं व्यक्तम् च अव्यक्तं च ज्ञः तथा पुरुषज्ञानं च एतत् त्रयाणां विवेकेन ज्ञानम् आवश्यिकि। सांख्यशास्त्राध्ययनद्वारा तत् ज्ञानं भवति। सांख्यमते प्रकृतिः तथा पुरुषः इति मूलतत्त्वद्वयम्। पुरुषः सर्वदा एकरूपम् अपरिणामी वा। पुरुषः चैतन्यस्वरूपं, कूटस्थः, निरवयवः, असङ्गः **असङ्गोऽयं पुरुषः**[7], नित्यशुद्धबुद्धमुक्त-स्वभावः, निरञ्जनः। शुद्धस्य तात्पर्यम्- पुरुषे किमपि विकारो न भवति। प्रकृतिः बहुरूपिणी परिणामिणी च। प्रकृतिः अशुद्धः परिणामिवशात्। पुरुषस्य अपरिणमित्वस्य हेतुर्भवति चैतन्य-स्वभावता। प्रकृतेः परिणामित्वस्य हेतुर्भवति जडता। जडपदार्थमात्रमेव नियतपरिणामशीलम्। जडप्रकृतेः प्रथमपरिणामः बुद्धिः। बुद्धिरियम् महत्, सत्त्वं, चित्तम्, अन्तःकरणमित्यभिधीयते। अन्तःकरणमिदं दर्पण-सदृशनिर्मलं तथा सङ्कोच-विकाश-स्वभावस्वरूपम्, तदर्थं चक्षुरिन्द्रिय-स्वभावद्वारा बहिर्देशं गमनम् अपि च घटपटादि-पदार्थानुरूपम् आकारधारणं सम्भवति। अन्तःकरणस्य स्वस्थानावस्थानपूर्वकं घटादि-विषयाकारपरिणतिः आकारधारणं वृत्तिरित्यभिधीयते। स्वच्छान्तःकरणसम्बद्धज्ञाने पुरुषस्य प्रतिविम्वकारणात् वृत्तिविशिष्टान्तःकरणे चैतन्यविशिष्ट-वुद्धिवृत्तिमुपलब्धिर्भवति। तदा पुरुषः अभिमानी भवति, यथा– अहं जानामि। मालाचन्दनवनितादेः सर्पकण्टकारादेः च सान्निध्यात् इन्द्रियद्वारा बुद्धेः या सुखदुःखाकारपरिणतिः स एव प्रत्ययः। एवंप्रकारेण सांख्याचार्येण बुद्धि-ज्ञान-उपलव्धि-प्रत्ययादि शब्दानामुल्लेखः प्राप्यते।

*बुद्धचरिते* अराडमुनिना द्वाविंशतितमेन श्लोकेन व्यक्तविषये उक्तम्—**जायते जीर्यते चैव बाध्यते म्रियते च यत्। तद्व्यक्तमिति विज्ञेयमव्यक्तं तु विपर्ययात्**॥ यद् जायते, जीर्यते, बाध्यते, म्रियते च तद् व्यक्तमिति, तद् विपरीतमव्यक्तम्। सांख्ये द्वयोः मूलतत्त्वयोः विवेचनमस्ति अव्यक्तं प्रधानं तथा पुरुषः। अव्यक्तस्य सत्तायाः सिद्धौ उक्तमस्ति यत् तन्मूलकारणमव्यक्तं त्रिगुणत्व-अविवेकित्वादि धर्मैर्युक्तमस्ति। पुरुषः चैतन्यसत्त्वावान् अव्यक्तस्य तद्विकारैः त्रिगुणत्वादिधर्मैः सर्वथा रहितो विपरीतः अभिगुणत्वादिधर्मवान् निर्गुणादिगुणैरुपेत आस्ते। ये च संघातात्मका अथवा संघटनात्मकाः पदार्थाः तैः सर्वे पदार्थाः अन्यस्य कृते भोगार्थये वा विद्यन्ते। एवं च अन्ये अव्यक्तमहतत्त्व-अहंकारादयो दृष्टिगोचरा न भवन्ति। तेऽपि त्रिगुणात्मकत्वात् पदार्था एव सिद्ध्यन्ति। अव्यक्तादुत्पन्नाः सर्वे ये संघटनात्मकपदार्थाः इमे पदार्था अर्थात् स्वभिन्नस्य अन्यस्य कृते सन्ति, स एव पुरुषः। अव्यक्तं तथा तदुत्पन्नाः समस्ताः पदार्था जडाः सन्ति, अत एतेषामधिष्ठानस्य, नियन्त्रणार्थं कस्यापि चेतनतत्त्वस्य आवश्यकमस्ति, यतः चेतनतत्त्वस्य अधिष्ठानं वा नियन्त्रणं विना जडाः पदार्था व्यवस्थितरूपेण कार्यं कर्तुं न क्षमन्ते। एष अधिष्ठाता सचेतनपुरुष एवास्ति। अव्यक्तमेवं तन्मूलकाः सर्वे पदार्थाः सुख-दुःख-मोहात्मकत्वात् भोग्यत्वकारणात् ते ईदृशं

कमपि भोक्तारमपेक्षन्ते, ते सुख-दुःख-मोहात्मकरूपेण वेदनीया भवेयुः, एतद् भोक्तृतत्त्वमेव पुरुषतत्त्वमास्ते। उक्तमेव—**संघातपरार्थत्वात् त्रिगुणादिविपर्यादधिष्ठानात्। पुरुषोऽस्ति भोक्तृ-भावात् कैवल्यार्थं प्रवृत्तेश्च**[8] ॥

पुरुषस्य कैवल्यार्थं प्रकृतेश्च दर्शनार्थं पङ्ग्वन्धवदुभयोः संयोगः स्वीक्रियते ततश्च सृष्ट्युत्पत्ति-र्जायते। तदुक्तम् ईश्वरकृष्णेन—**पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य। पङ्ग्वन्ध-वदुभयोरपि संयोगस्तत्कृतः सर्गः**[9]॥ सृष्टेः प्राग् गुणत्रयं साम्यावस्थायामवतिष्ठते। सति पुरुषप्रकृतिसंयोगे गुणेषु क्षोभः संजायते। गुणक्षोभे च रजोगुणे चाञ्चल्यमुत्पद्यते। ततश्च सृष्ट्युत्पत्तिः प्रवर्तते तत्र प्रकृतिपुरुषसंयोगस्य महदादीनां निमितत्वेऽपि उपादानमन्तरेण कार्योत्पत्तेरसम्भवात् पुरुषस्य चापरिणामित्वात् तात्त्विकसङ्गरहितत्वाच्च न कार्योपादानत्वम्, अतोऽव्यक्तमेव महदादेरुपादानमिति मनसि निधाय ग्रन्थकर्त्रा आह **प्रकृते-र्महांस्ततोऽहंकार-स्तस्माद्गणश्च षोडशकः । तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि**[10]॥

मूलप्रकृतिः अर्थात् सांख्याभिमत-एवंविधं मूलकारणं यस्य अन्यत् किमपि कारणं न भवेत् अविकृतिरस्ति। अर्थात् तन्मूलकारणं कस्यापि अन्यकारणतत्त्वस्य विकारः वा कार्यं नास्ति। अतः तस्मान्महतत्त्वस्योत्पत्तिर्भवति। महत एव नामान्तरं बुद्धिः। बुद्धिरेव कर्तव्याकर्तव्यं व्यवच्छिनत्ति, ज्ञातृज्ञेयं विनिश्चिनति, स्वम् अपरं च प्रकाशयति। अध्यवसायो बुद्धेर्वृत्तिः तत्र **एवमेव** इति निश्चयोऽध्यवसायः। निश्चयात्मकं तत्त्वं बुद्धिः धर्मः, ज्ञानं वैराग्यम्, ऐश्वर्यं च बुद्धेः सात्त्विकरूपाणि सन्ति। *बुद्धतरिते* अराडमुनिना अहंकारविषये षड्विंशतितमेन श्लोकेन उक्तम्—**ब्रवीम्यहमहं वेद्मि गच्छाम्यहमहं स्थितः। इतीहैवमहंकारस्त्वनहंकार वर्तते**॥ अराड्मुनेः वक्तव्यमष्टविंशतितमेन श्लोकेन—**य एवाहं स एवेदं मनो बुद्धिश्च कर्म च। यश्चैवैष गणः सोऽहमिति सोऽभिसंप्लवः**॥ यदा पुरुषः कस्मिंश्चित् कर्मणि प्रवृत्तो भवति, तदा तदीयान्तःकरणे तिस्रः क्रिया उत्पद्यन्ते। यथा प्राक् वस्तुनः ज्ञानम्, तत्र **अहमत्राधिकारी** इत्यभिमानः, ततः **मया इदं कर्तव्यम्** इति निश्चयज्ञानम्। तत्र तृतीया वृत्तिरेवाध्यवसायः। महतोऽहंकारस्योत्पत्तिः। तत्र अहमित्यभिमानोऽहंकारः। अहम्बुद्धिरेव **अहं कर्ता**, **इदं मम** इत्यादिस्वरूपां मतिं जनयति। स च त्रिविधः सात्त्विकराजस-तामसभेदात्। तत्र वैकारिकः तैजसः राजसाहंकारः, भुतादिश्च तामसः। उक्तमेव– **सात्त्विक एकादशकः प्रवर्तते वैकृतादहंकारात्। भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम्**[11]॥

तत्र सात्त्विकादहंकारात् पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि मनश्चेति एकादशको गणो जायते। तत्र श्रोत्रचक्षुस्त्वग्जिह्वाघ्राणानि पञ्च ज्ञानेन्द्रियाणि। श्रोत्रादीनां पञ्चानामपि श्रवण-दर्शनादिज्ञानसाधनत्वात् तत्पदाभिधेयत्वम्। वाक्-पाणि-पाद-पायु-उपस्थानि पञ्च कर्मेन्द्रियाणि।

तानि वचनादानविहरणोत्सर्गानन्दाश्च कुर्वन्ति। संकल्पविकल्पात्मकं ज्ञानकर्मेन्द्रियात्मकम् उभयात्मकं मनः संकल्पविकल्पं कृत्वा अहंकाराय प्रयच्छति, पुनश्चाहंकारः बुद्धौ प्रयच्छति, तदा बुद्धिद्वारा पुरुषस्य अर्थप्रकाशनं सम्भवति। तामसादहंकाराच्च शब्द-स्पर्श-रूप-रस-गन्धाख्यानि पञ्च तन्मात्राणि प्रादुर्भवन्ति। पञ्च-तन्मात्रेभ्यश्च आकाश-वायु-अग्नि-जल-पृथ्वी-नामकानि पञ्च महाभूतानि समुद्भवन्ति। तत्र शब्दतन्मात्रात् शब्दगुणकमाकाशं, शब्दतन्मात्रसहितास्पर्श-तन्मात्रादवायुः शब्दस्पर्शगुणं, शब्दस्पर्शतन्मात्रसहितात् रूपतन्मात्रात् तेजः शब्दस्पर्शरूपगुणं, शब्दस्पर्शरूपतन्मात्रसहितात् रसतन्मात्रादापः शब्दस्पर्शरूपरसगुणाः, शब्दस्पर्शरूपरसतन्मात्र-सहिताद् गन्धतन्मात्रात् शब्द-स्पर्शरूपरसगन्धगुणं पृथिवी जायते। महतत्त्वादयः सप्त यथा महत्तत्त्वम्, अहंकारः, पञ्च तन्मात्राः एतानि सप्त तत्त्वानि वा पदार्थाः प्रकृति-विकृतिरूपाणि सन्ति। अर्थात् इमानि सप्त कारणानि तथा कार्याणि उभयरूपाणि सन्ति। षोडशकस्तु विकारः षोडशपदार्थानां समुदाय–आकाशादयः पञ्च महाभूताः, पञ्च ज्ञानेन्द्रियाणि एवं पञ्च कर्मेन्द्रियाणि तथा मनः एतै षोड पदार्थाः केवलं विकाररूपाः वा कार्यरूपाः सन्ति।

********

आकरनिर्देशः

---

[1]सा.का. १

[2]तदेव पृ-१०

[3]तदेव पृ-११

[4]तदेव पृ-१६

[5]सा.का. १२

[6]तदेव १३

[7]सा.सू. १.४०

[8]सा.का. १७

[9]तदेव २१

[10]तदेव २२

[11]तदेव २५

## *बुद्धचरिते* योगदर्शनविमर्शः

असितमुनिः शुद्धोदनमवदत् यत् पुत्रस्ते साक्षात्योगारूढो भविष्यति। पुत्रस्ते धर्मनायको भविष्यति। अनेन प्रवृत्ता धर्मनदी संसारतापक्लिष्टानां धर्मपिपासुनां तृष्णाया अभिभूतानां धर्मपिपासा नूनमेव दूरीकरिष्यति। समाधिशैत्येन शीतला भविष्यति। *बुद्धचरिते* बुद्धत्वप्राप्तिनामके चतुर्दशसर्गे दृश्यते सिद्धार्थः अन्तरिन्द्रियं बहिरिन्द्रियं च संयम्य आसनमुपविश्य योगमास्थाय समाधिमययौ। समाधेः अपरनाम योगः। योगं विना समाधिरसम्भवः।

युज् समाधौ धातोः घञ् प्रत्ययेन योगशब्द निष्पद्यते। योगविद्या भारतवर्षस्य अमूल्यनिधिः। पुराकालादेव अविच्छिन्नरूपेण गुरुपरम्परापूर्वकं प्रचलितमस्ति। वस्तुतः ऋषिमुनियोगिनाम् अध्यवसायजनितं साधनालब्धमन्तर्जगतो महत्व-पूर्णमन्तर्विज्ञानं प्राप्तं भवत्यत्यत्र। अनेन योग-समाधिना ऋषयो मन्त्रान् द्रष्टुं समर्था आसन् श्रीमद्भगवद्गीतायां योगस्य द्विविधत्वं वर्णितं श्रीकृष्णेन। यथा–ज्ञानयोगः, कर्मयोगश्च। परस्परनिरपेक्षंमोक्षसाधनत्वेन कर्मज्ञानयोगरूपं निष्ठाद्वयम् उक्तम्। युज् समाधौ धातोः घञ् प्रत्ययेन योगशब्दो निष्पद्यते। योगस्य स्वरूपं तु अभ्यास-पूर्वकं वैराग्यपूर्वकं च चित्तवृत्तिनिरोध एव। चित्तवृत्तिनिरोधस्यार्थो मनसि एकमेव ज्ञानम् उद्भावयित्वा अन्येषां सर्वेषां ज्ञानानां निरोधः सम्प्रज्ञातः, सर्वेषां वा व्यावहारिकज्ञानानां निरोधः असम्प्रज्ञातः इति कथ्यते। अभ्यासस्यार्थो पौनपुन्येन चेष्टाकारणम्। ईदृशी चेष्टा इच्छापूर्वकचित्तवृत्तिनिरोधो वा योगः कथ्यते– **योगश्चित्तवृत्तिनिरोधः**[1]। वृत्तिनिरोधमात्र एव योगो न, ग्राह्यग्रहणग्रहीतादिविषयेषु कस्मिन्नप्यैकस्मिन् इच्छापूर्वकं स्थितिं कृत्वा वृत्तीनां यो रोधो भवति, स एव योगः।

योगाङ्गानि अष्टसंख्यकानि। महाभारते समीहितं– **वेदेषु चाष्टगुणिनं योगमाहुर्मनीषिणः**[2]। तेषामनुष्ठानेन पञ्चविपर्ययरूपाशुद्धयः क्षीयन्ते तत्क्षयेन च सम्यग्ज्ञानमभिव्यञ्जते। एतानि योगस्याष्टसोपानानि—**यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधयः अष्टौ अङ्गानि**[3]। एतेषामङ्गानां स्वरूपं--

**यमाः–अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः**[4]। यमाः पञ्चसंख्यकाः– अहिंसा, सत्यम्, अस्तेयः, ब्रह्मचर्यम्, अपरिग्रहः च।

**नियमाः**–नियमाचरणं मनसंयमस्य हेतुः। नियमा अपि पञ्चसंख्यकाः। योगसूत्रे उक्तम्– **शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमाः**[5]।ते हि—शौचः, सन्तोषः, तमः, स्वाध्यायः, ईश्वरप्रणिधानम्।

**आसनम्—स्थिरसुखासनम्**[6] निश्चलतया सुखपूर्वकमुपवेशनमेवासनमुच्यते। भद्रासन-वीरासन-स्वस्तिकासन-दण्डकासन-सोपाश्रय-पर्य्यङ्क-क्रौञ्चनिषदन-उष्टनिषदन-समवस्थानानि एतानि सर्वाण्यसनानि स्थिरसुखानि। आसनं दीर्घजीवनकारकं यन्माध्यमेन प्रत्यहनि उच्चतर-दशाप्राप्तार्थं कतिपयाः शारीरिकमानसिकक्रियाः क्रियन्ते। आसनं सिद्धं भवति। आसन-सिद्धिरर्थात् शरीरस्य सम्यक् स्थैर्यं सुखावहता च प्रयत्नशैथिल्येन अनन्तसमापत्तिः च कथिता। प्रयत्नशैथिल्यस्यार्थः शरीरस्य शवसदृश-निष्प्रयत्नभावः। एवं प्रकारेण आसनैः शरीरं स्थिरं कुर्यात् येन शरीरे कथंचिदपि वक्रता न जायेत। अनेन स्थैर्यमागच्छति पीडाबोधश्च न्युनो भूत्वा शरीरजयः प्राप्यते। आसनजयी साधकः शीतोष्णक्षुत्पिपासादिभिर्नाभिभूयते।

**प्राणायामः—श्वासप्रश्वासयोर्गतिविच्छेदः प्राणायामः**[7]**।** आसनजये श्वासप्रश्वासयोर्यो गतिः विच्छिद्यते स एव प्राणायामः। प्राणायामाभ्यासः परम्पराक्रमाश्रितः। आसनसिद्धिपश्चादेवायं प्राणायामः साध्यते। अस्थिरचित्तस्य प्राणायामो योगाङ्गरूपेण न गण्यते। सर्वप्रथममासनेन सह एकाग्रताभ्यास आवश्यकः। वायोः श्वासरूपा या आभ्यान्तरगतिः या च प्रश्वासरूपा बहिर्गतिः, तयोर्विच्छेदभूतः प्राणायामो दीर्घः सूक्ष्मो वा भवति। दीर्घस्यार्थः दीर्घकालव्यापकं रेचनं विधारणं वा। सूक्ष्मस्यार्थः श्वासप्रश्वासक्षीणता विधारणं च। प्राणायामैस्तु दह्यन्ते तदवदिन्द्रियजा मलाः।

**प्रत्याहारः—स्वविषयासम्प्रयोगे चित्तस्य स्वरूपानुकार एवेन्द्रियाणां प्रत्याहारः**[8]**।** स्वेच्छया इन्द्रियसमूहान् तदभिमतविषात् निराकृत्य चित्तानुगतकरणं प्रत्याहारः। प्रत्याहारसाधनस्य प्रधानोपायद्वयम्–बाह्यविषये अलक्ष्यीकरणं, चित्तैकाग्यं च। यमनियमादीनामभ्यासेन सह प्रत्याहारः श्रेयस्करो योगसाधने। चित्तनिरोधे सति इन्द्रियनिरोधसाधनरूपप्रत्याहार एव योगिनामुपादेयः। प्रत्याहातस्यार्थः– एकत्रीकरणम्, इन्द्रियेभ्यो मुक्तिः। योऽपीच्छानुसारं चित्तमिन्द्रियेभ्यो मोचयितुं शक्यः, स एव प्रत्याहारे सफलः यथा मनःवशीकरणमेव प्रत्याहारः।

**धारणा—**योगदर्शने उक्तम्– **देशबन्धश्चित्तस्य धारणा**[9]**।**नाभिचक्र-हृदयपुण्डरीक-नासिकाग्र-जिनाग्रेत्यादिषु देशेषु बाह्यविषयेषु वा वृत्तिमात्रेणैव चित्तबन्धो धारणारूपेण कथ्यते। आध्यात्मिक-देशे चित्तबन्ध अनुभवगम्यो बाह्यांशे च इन्द्रियवृत्तिगम्यस्तिष्ठति। प्राणायामादिष्वपि धारणाभ्यास आवश्यकः परं सा साधारणतः ध्यानधारणा परंतु वस्तुतः तस्यै इदं कथनमनुचितम्। उन्नतिं दधन्ती सैव भावना धारणाध्यानयोर्जननी। धारणायाः अर्थः—चित्तमन्यस्थानेभ्यो वारयित्वा शरीरस्य कतिचित्स्थलबिन्दुषु नियोजनम्। यदा मन एकस्मिन्स्थाने एकाग्रं क्रियते तदा सा क्रियाधारणा कथ्यते।

**ध्यानम्**—योगदर्शने ध्यानस्य परिभाषा एवं प्रदत्ता– **तत्र प्रत्ययैकतानता ध्यानम्**[10]। नाभिचक्र-हृदयपुण्डरीक-नासिकाग्र-जिनाग्रेत्यादिषु देशेषु ध्येयविषयकप्रत्ययस्य या एकतानता अन्यप्रत्ययात् अपरामृष्टप्रवाहश्च, स एव ध्यानम्। ध्यानं चित्तस्थैर्यस्य अवस्थाविशेषः। ध्यानस्य प्रत्ययः मधुधारासदृशैकता। शास्त्रे उक्तम्– **समं कायशिरोग्रीवं धारयन्नचलं स्थिरः। संप्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन्**[11]**॥**

**समाधिः**–समाधेः स्वरूपं निरूपयन् पतञ्जलिः लिखति– **तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः**[12]। समाधिरूपेण ध्यानचरमोत्कर्षस्यैव नाम समाधिर्या चित्तस्थैर्यस्य सर्वोच्चावस्था विद्यते। यदा ध्यानम् अर्थमात्रनिर्भासितम् अर्थात् ध्येयविषयमात्रस्यैव ख्यातिशेषे भवति तदा समाधिरित्यभिधीयते। संक्षिप्तरूपेण आत्मविस्मृतिरूपस्थैर्यमेव समाधिरिति कथ्यते। समाधिं विना आत्मसाक्षात्कारः न सिध्यति। आत्मसाक्षात्कारः समाधिफलं येन युक्त उपासकः सांसारिक-कर्मसु न पतति, परमेश्वरमेव च अधिगन्तुमिच्छति। शास्त्रे धारणा-ध्यान-समाधयः एकत्रमेव संयम इति आख्यायते।

योगिन इन्द्रियाणि सदा मनसः अनुकुर्वन्ते। यथा प्रयुक्तयोगस्य प्रयुक्तः प्रयोगविषयीकृतो योगः चित्तवृत्तिनिरोधरूपो येन तस्य योगिनः चेतसि मनसि शमात्मके शमो विषयवैराग्यमेव आत्मा स्वभावो यस्य तथाभूते विप्रसन्ने विशेषेण प्रसादं प्राप्ते सति यथा इन्द्रियाणि मनोनुरूपमेव चरन्ति। मनसः स्थैर्यम् अवश्यकम्, अन्यथा इन्द्रियाणि अस्थिराणि भवन्ति। योगयुक्त-मानवहृदयं सदा शान्तं प्रसन्नं भवति। मनसः संयमार्थं अहिंसा-सत्य-अस्तेय-ब्रह्मचर्य-अपरिग्रहरूपोयमो नाम योगाङ्गस्य भूमिका अनस्वीकार्या।

**अहिंसा**—सर्वदा सर्वथा च सर्वभूतनभिद्रोहोऽहिंसाशब्दवाच्यः। श्रुतयो वदन्ति यत् मा हिंस्येत् सर्वभूतानि। प्राणिमात्रं प्रति मैत्र्यादिसद्भावपोषणम् अहिंसायाः स्वरूपम्। सर्वथावाह्यविषयक-स्वार्थत्यागं विना अहिंसाचरणः न शक्यः। बाह्यसुखान्वेषणे तु परपीडा अवश्यम्भाविन्येव। परपीडा, परुषवाक्येन मर्मच्छेदप्रभृतीनि हिंसाया रूपाणि। योगिनः सर्वदा अहिंसाचारणार्थं चेष्टन्ते। प्रथमस्तु योगिनः मनुष्यमात्रस्य हिंसां वर्जयन्ति, अनन्तरं पशून् प्रत्यपि यथासम्भवम् अहिंसामाचरन्ति, स्थावर-प्राणिनोऽपि नोत्पीडयन्ति, शीर्णपत्रादीनां भोजनेन भिक्षान्नेन वा तैः देहो धारयति।

**सत्यम्**—यो विषयः सिद्धः, तदनुरूपं मनसा वाचा कर्मणा आचरणं तु सत्यमुच्यते। यथा दृष्टं, यथानुमितं, यथा श्रुतं, तथैव वाचि मनसि च भवेत्, इयं सत्यावधारणा। परपीडाप्रदसत्यं न वाच्यं न च चिन्त्यम्। श्रुतिर्वदति– **सत्यमेव जयते नानृतं सत्येन पन्था विवतो देवयानः**[13]। सत्यसाधने प्रथमं मौनस्याल्पभाषितायाः वाऽभ्यासः क्रियते। बहुभाषिणो बहुधाऽसत्यं वदन्ति। सत्यस्य महत्वं

प्रतिपादयन् उक्तम्– **अश्वमेधसहस्रं च सत्यं तुलया धृतम्**[14]। कल्पनाविलासत्यागं विना प्रकृतसत्यसाधनं सुदुष्करम्। यत्र सत्यभाषणेनापरस्यानिष्टो भवेत् तत्र मौनं विधेयम्। सदुद्देश्यस्य हेतोरसत्यमपि कथनीयम्। अर्धसत्यं तु हेयमेव वर्तते। उक्तं च—**सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्। प्रियं च नानृतं ब्रूयात् एषः धर्मः सनातनः**[15]।

**अस्तेयः**—यददत्तं धर्मतो वाप्राप्यं तस्य द्रव्यस्य ग्रहणं स्तेयपदाभिधेयम्। मनसि तस्य परित्यागः, तादृशीस्पृहायाः दमनरूपो यो निःस्पृहभावविशेष, स एवास्तेयः। सद्यः प्राप्तं भूगर्भस्थितं द्रव्यं न गृह्णीयात् यथा हि तत्परस्वम्। फलतो यन्निजस्वं न, तस्मै स्पृहात्यागस्य चेष्टैव अस्तेयसाधनरूपेण ज्ञायते। यथा श्रुतिरपि वदति--- **मा गृधः कस्यस्विद्धनम्**[16]।

**ब्रह्मचर्यम्**—चक्षुरादीनि सर्वेन्द्रियाणि संयम्य अर्थात् विषयेभ्यः इन्द्रियगणं संयम्य उपस्थसंयम एव ब्रह्मचर्यम्। मात्रोपस्थसंयम एव ब्रह्मचर्यं न । **स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणम्। संकल्पोऽध्यवसायश्च क्रियानिष्पत्तिरेव च।। एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः। विपरीतं ब्रह्मचर्यमनुष्ठेयं मुमुक्षुभिः**[17]।। ब्रह्मचर्य-हेतोर्मिताहार आवश्यकः, प्रचुरघृत-दुग्धादयस्तु भोगिने एव सात्विकाहाररूपेण कथ्यन्ते। **अब्रह्मचारिणे आत्मसाक्षात्कारो न शक्यते**[18]**।** जीवने कदापि अब्रह्मचारणं न करिष्यामि– इत्यनेन संकल्पेन ब्रह्मचर्यमार्गः प्रशस्यते।

**अपरिग्रहः**—विषयार्जनात् दुःखं, रक्षणात् दुःखं, क्षयात् दुःखं, संस्कारजनितदुःखं, विषयग्रहणेन अवश्यम्भाविनी हिंसा तज्जनितं च दुःखम् एतानि सर्वाण्यपिदुःखानि ज्ञात्वा दुःखदूरीकरणाय प्रथमं तु विषयत्यागं कुर्वन्ति पश्चात् चान्यविषयाग्रहणम्। प्राणधारणद्रव्यमात्रैः जीवनधारणं कुर्वन्ति।

पञ्चनियमाः– **शौचः**—शौचो द्विविधः। मृत्तदलादिजनिताः मेध्याहारप्रभृतयस्ते बाह्यशौचाः चित्तमलप्रक्षालनं च आभ्यन्तरशौचो निगद्यते। शौचाचरणं ब्रह्मचर्यादिषु सहायकम्। शरीर-वस्त्र-स्थान-पात्र-भोजनादीनां शुद्धीकरणं तथा धन-सम्पत्तीनां न्यायपूर्वकं उपार्जनं बाह्यशौचाः, अविद्यामिथ्याभिमान-राग-द्वेष-काम-क्रोध-लोभ-मोहादीनां दूरीकरणमाभ्यन्तरशौचाः। अमेध्याहारेण शरीरमशुचिपदार्थानामागमनं भवति येन मनसि मलिनभावा उत्पद्यन्ते, उत्तेजक-पदार्था अमेध्याः तेषां संसर्ग आहारो वर्जनीयः। बाह्यशुद्ध्यपेक्षया आभ्यन्तरशुद्धिः अधिकपरिश्रमसाध्या । उक्तमेवम् --- **परलोके इहलोके च यदपि हितकरं परमश्रेयञ्च, तत्सर्वमेव मनःसमाधिमाध्यमेन लभ्यः**[19]।

**सन्तोषः**—सन्निहितसाधनादधिकस्यानुदित्सा सन्तोषः। कस्यापीष्टपदार्थस्य प्राप्तेः यः तुष्टनिश्चित-भावो जायते। यदपि प्राप्तं तदैव पर्याप्तम्-- इत्येतादृशीभावनया उक्ततुषिटनिश्चितभावो ध्यायते। इदमेव

सन्तोषसाधनम्। महाभारते सन्तोषविषये कथितं—**न जातु कामः कामानामुपभोगेन शाम्यति। हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते**[20]**।।** यस्य मानसं सन्तुष्ट, सर्वा अपि सम्पदः तस्यैव, अतः संतोष एव प्रकृष्टं धनम्। संतोषस्य महत्तं प्रतिपादयन् योगदर्शने उक्तं यत् सन्तोषादनुत्तमः सुखलाभः। सन्तोषामृततृप्तानां यत्सुखं जायते तद् विश्वस्य समग्रमपि ऐश्वर्यं प्राप्य लब्धुं न शक्यते।

**तपः**—क्षुत्पिपासयोः, शीतग्रीष्मयोः, स्थानासनयोः च द्वन्दसहनं तपः। श्रुतिर्वदति—**न तत्र दक्षिणा यान्ति नाविद्वांसस्तपस्विनः**[21]। येऽल्पमात्रदुःखेनैव भीताः, तेषां योगसिद्ध्याशा न विद्यते। अतो दुःखसहिष्णुतार्थं तितिक्षासाधनं करणीयम्। यदा शारीरिकसुखाभावेऽपि मनसि विकृतिर्नोत्पद्यते तदैव योगसाधने उत्तमाधिकारः। परुषवचनसहनेन क्षुत्पिपासासहनेन च सहसा ध्यानो न जायते आसनाच्च शरीरस्थैर्यं प्राप्यते। उक्तम्—**कायेन्द्रियसिद्ध्यशुद्धिक्षयात्**[22]।

**स्वाध्यायः**—आत्मने हितकारकं शास्त्राध्ययनमेव स्वाध्यायः श्रुतेर्वा सम्यगध्ययनं स्वाध्यायः परिज्ञायते। अर्थशुद्धिर्वचनशुद्धिपुर्वकं चाध्ययनं स्वाध्यायः कथ्यते। आलस्यं त्यक्त्वा ज्ञानाराधनमेव स्वाध्यायः। विश्लेषणं प्रकारद्वयेन भवति—१)स्वस्यात्मनोऽध्यायनम् आत्मनिरीक्षणं च, २)स्वकीयमध्ययनं मननं च। अयं स्वाध्यायः सज्जनानां चक्षुसदृशः। अयं स्वाध्यायः प्रज्ञातिशयाय, प्रशस्ताध्यवसायाय, प्रवचनस्थित्यै, संशयोच्छेदार्थं, परमसंवेगार्थं, तपोवृद्धिहेतोः, निर्मलचरित्रप्राप्तै च क्रियते। मोक्षसम्बद्धशास्त्राध्ययनेन विषयचिन्ता क्षीयते परमार्थे च रुचिर्ज्ञानं च वर्धते। योगाभ्यासमार्गे अज्ञानं सर्वप्रबलबाधकम्। इदमज्ञानमेव सर्वक्लेशमूलं वर्तते ज्ञानेनैव तन्निवृत्तिः शक्या। अतो ज्ञानप्राप्तये ऋषिभिः स्वाध्यायो विहितः। योगदर्शने प्रणवपूर्वाणां जपः स्वाध्यायः कथितः। योगदर्शने उक्तम्—**स्वाध्यायादिष्टदेवता-संप्रयोगः**[23]**।**

**ईश्वरप्रणिधानम्**– योगदर्शनानुसारं सर्वक्रियाणां परमगुरौ अर्पणं तत्फलसन्न्यासो वा ईश्वरप्रणिधानं कथ्यते। प्रशान्तमनसि ईश्वरं भावयित्वा तेनैव सर्वापरिहार्यचेष्टाः क्रियन्ते इत्येतादृशीभावनया प्रत्येकस्मिन् कर्मणि कर्मफलाकाङ्खात्यागः ईश्वरार्थं सर्वकर्मसमर्पणं कथ्यते इत्थमेव निश्चिन्त-साधकः शयनासनादिषु सर्वकार्येषु निजम् ईश्वरस्थं शान्तस्वरूपं वा ज्ञात्वा शरीरयात्रां निर्वहति। स्वान्तःकरणे चिद्रूपेश्वरं चिन्तयति योगी। ईश्वरं विस्मृत्य कर्मकरणेन तस्य कर्मसमर्पणं न, कर्ताऽस्मि इत्येतादृश्या भावनया हृदये ईश्वरस्मरणेन सह कर्मकरणमेव कर्मण ईश्वरसमर्पणम्। तत्कर्मणः फलं योगं निवृत्तं वा प्रति गच्छेत्, इमं चिन्तयित्वा कर्मकरणेनापि ईश्वरप्रणिधानं कथ्यते। ईश्वरप्रणिधानं कथ्यते। ईश्वरप्रणिधानैव समाधिसिद्धिर्भवति। मनसःसंयमार्थं शौच-सन्तोष-तप-स्वाध्याय-ईश्वरप्रणिधानरूपो नियमो नाम योगाङ्गस्य भूमिका अनस्वीकार्या। इत्यादिप्रकारेण योगाङ्गद्वारा

इन्द्रियसंयमनिर्देशः प्राप्यते। अमरकोशे लिखितम् योगविषये सन्नहनोपायः ध्यानसंगति युक्तिषु। इत्यादिप्रकारेण योगाङ्गद्वारा इन्द्रियसंयमनिर्देशः प्राप्यते।

सप्तमसर्गे दृश्यते सप्तविंशतितमेन श्लोकेन सिद्धार्थेन उक्तम्... **यतः शरीरं मनसो वशेन प्रवर्तते चापि निवर्तते च। युक्तो दमश्चेतस एव तस्माच्चित्तादृते काष्ठयमं शरीरम्**।। मनसो वशेन एव विषये प्रवृत्तिः तथा निवृत्तिः, अतः चित्तदमनमावश्यकम्। इत्यत्रापि योगदर्शनोक्त-चित्तदमनप्रसङ्गः चित्तवृत्तिनिरोध इति। योगदर्शने उक्तं कर्मफलमनपेक्षमाणः सन् अवश्यं विहितं कर्म यः करोति स एव योगी भवति। इन्द्रिय-भोगेषु तत्साधनेषु च कर्मसु यदा आसक्तिं न करोति, सर्वान् भोगविषयान् परित्यजति तदा स योगारूढो भवति। त्रयोदशसर्गेऽपि दृश्यते यद् मारेण सिद्धार्थोपरि चित्तवृत्ति-संघटनार्थं चेष्टा परिलक्षिता, परंतु सिद्धार्थः साक्षाद् योगारूढः। योगारूढः स एव भवति यः एकान्ते स्थितः सन् सङ्गशून्यो भूत्वा मनो वशीकृत्य आशां परिग्रहं च परित्यज्य सततमात्मानं समाहितं कुर्यात्।

*********

आकरनिर्देशः

---

[1]यो.सू. १.२

[2]महाभारतम्, शान्तिपर्वः ३१६.७

[3]यो.सू. २.२९

[4]तदेव ३०

[5]तदेव ३२

[6]तदेव ४६

[7]तदेव ४९

[8]तदेव ५४

[9]यो.सू. ३.१

[10]तदेव २

[11]भ.गी. ६.१३

[12]यो.सू. ३.३

[13]मु.उप. ३.११६

[14]महाभारतम् आदिपर्वः ७४.१०३

[15]मनु.

[16] ई.उप. १.१

[17]दक्षस्मृतिः ७.३१-३२

[18]मु.उप. ३.१.५

[19]चरकसंहिता, चिकित्सास्थानम् २४.५२

[20]महाभारतम् आदिपर्वः ८५.२

[21]शतपथब्राह्मणः १०.५.४.१५

[22]यो.सू. २.४३

[23]तदेव ४४

# *बुद्धचरिते* जैनदर्शनविमर्शः

*बुद्धचरिते* कामविगर्हणनामके एकादशसर्गे दृश्यते विम्विसारस्य राज्यभोगरूपोक्तेः प्रत्युत्तरेण सिद्धार्थेन वक्तव्यमेतत्—विषया दुःखप्रतिकारस्य उपायमात्रम्, न आनन्दप्रदाः अत एव विषयाणां भोगसंज्ञा न तात्पर्यवहा– एवंप्रकारेण भोग्यवस्तुनां तात्पर्यविश्लेषणं क्रियते। ततःपरं भोग्यवस्तुनां विषये युक्तिः प्रदीयते सिद्धार्थेन– ये विषयाः सुखं दिशन्ति, ते विषया पुनो दुःखमावहन्ति, यथा शीतकाले गुरूणि अगुरूणि च वासांसि सुखाय प्रवर्तन्ते तथा ग्रीष्मकाले असुखाय परिवर्तन्ते, अपि च यथा ग्रीष्मकाले चन्द्रकिरणानि चन्द्रनं च सुखाय भवन्ति तथा शीतकाले दुःखाय भवन्ति– एवंप्रकारेण यतो जगति लाभ-क्षतिरूपाणि विरुद्धानि भावानि सर्वेषु वस्तुषु विद्यन्ते, अतो जगति कश्चित् पुरुषो न एकान्ततः सुखी अस्ति नापि एकान्ततो दुःखी अस्ति। तत्र एकचत्वारिंशत्तमेन श्लोकेन उक्तम्—**य एव भावा हि सुखं दिशन्ति त एव दुःखं पुनरावहन्ति,** द्वाचत्वारिंशत्तमेन श्लोकेन उक्तम्– **गुरूणि वासांस्यगुरूणि चैव सुखाय शीते ह्यसुखाय घर्मे। चन्द्रांशवश्चन्दनमेव चोष्णे सुखाय दुःखाय भवन्ति शीते।।** त्रिचत्वारिंशत्तमेन श्लोकेन उक्तम्—**द्वन्द्वानि सर्वस्य यतः प्रसक्तान्यलाभलाभप्रभृतीनि लोके। अतोऽपि नैकान्तसुखोऽस्ति कश्चिन्नैकान्तदुःखः पुरुषः पृथिव्याम्।।** इत्यत्र जैन-स्याद्वादस्य वा अकान्तवादस्य आभासः प्राप्यते।

जैनस्याद्वादः किम्—भारतीयदर्शनेषु अन्यतमं दर्शनं जैनदर्शनम् । जैनदर्शने अहिंसा एव मूलतत्त्वरूपेण अङ्गीकृता। जैनदर्शनान्तर्गतः स्याद्वादः कस्यापि वस्तुनः गुणाभिव्यक्त्यर्थं एकः सापेक्षिकः सिद्धान्तः। अनेकान्तवादानुसारं कस्यापि वस्तुनो यथार्थतत्त्वमेकान्तभावेन अवगन्तुं न शक्यते। किमपि वस्तु निर्दिष्टरूपेण सत् असत् सदसत् वा – इति वक्तुं न शक्यते। प्रत्येकमपि मतवादमांशिकरूपेण सत्, किमपि न चरमसत्यम्। एकान्त शब्दस्यार्थः निश्चितरूपेण निर्णीतरूपेण वा एकप्रकारः, अनेकान्तस्यार्थः वस्तुनोऽनेकप्रकारः। किमपि वस्तु न एकमेव रूपं, नापि एकप्रकारम्। किमपि वस्तु एकान्तभावेन निश्चितभावेन वा अस्ति नास्ति इत्यादिरूपेण न वर्णीक्रियते। अनेकान्तवाद-प्रतिष्ठाकल्पे जैनैः स्याद्वादो घोषितः। स्याद्वादो वस्तुन एकान्त-भावमस्वीकृत्य अनेकान्तवादं स्वीकरोति। वक्तव्यमेवं मृण्मय घटो मृत्तिकारूपेण यथा सत्यं मृत्तिकाविकाररूपेण तथा सत्यम्। रक्तवर्णपुष्पं रक्तवर्णविशिष्टरूपेण यथा सत्यं तथा अकृष्णवर्ण-विशिष्टरूपेणापि सत्यम्। आत्मनो द्रव्यभागः सदा स्वीय-स्वाभाविकरूपेण अपरिवर्तितः परंतु पर्यायभागः सदा परिवर्तनशीलः। अत आत्मा द्रव्य-पर्यायरूपेण उभयात्मकः। दृष्टान्तरूपेण उल्लिख्यते षण्णां दृष्टिहीन-मानवानां हस्तिदर्शनम्, प्रथमजनो हस्तिनः कर्णं स्पृशति, उक्तं हस्ती कुलोसदृशः। द्वितीयजनो हस्तिनः पदं स्पृशति, उक्तं हस्ती स्तम्भसदृशः। तृतीयजनो हस्तिनः शुण्डं

स्पृशति, उक्तं हस्ती सर्पसदृशः। चतुर्थजनो हस्तिनो पुच्छं स्पृशति, उक्तं हस्ती रज्जुसदृशः। पञ्चमजन उदरं स्पृशति, उक्तं हस्ती प्राकारसदृशः। षष्ठजनो हस्तिनो मस्तकं स्पृशति, उक्तं हस्ती छत्रसदृशः। अतएव एतेषां दृष्टिहीनानां प्रत्येकस्य मतवादमांशिकरूपेण सत्, परंतु न चरमसत्यम्। अनन्त-धर्मविशिष्ट-वस्तुनो निर्दिष्टधर्मज्ञानं नय इति आख्यायते। प्रत्येक-नय-वचनस्य सत्यता सीमिता। नयस्य आपेक्षिक-सत्यतार्थं जैनज्ञानसम्पृक्त-मतवादः स्याद्वाद इत्याख्यायते। स्यात् इत्यस्यार्थः कथंचित्। स्याद्धः कथंचिद् इति विशेषप्रयोगद्वारा एकान्तं तथा निश्चयं परिहरति। *बुद्धचरिते* एवंप्रकारेण सिद्धार्थेन विषयाणां सुख-दुःखानुभवम् एकान्तरूपेण तथा निश्चितरूपेण त्यज्यम्। माधवाचार्यमतानुसारं सप्तभङ्गी नय हेय-आदेयभेदेन विकल्पं निर्दिशति। उक्तमेव– **स्याद्वादः सर्वथैकान्तत्यात् किंवृत्तचिद्विधेः। सप्तभङ्गीनयापेक्षो हेयादेयविशेषकृत्**[1]।।

जैनाः सप्तभङ्गीनयाख्यं न्यायं सर्वत्र अवतारयन्ति। एतेषां सप्तभङ्गानां विवरणं संक्षेपेणात्र निर्दिश्यते। १)स्यादस्ति– प्रथमं मतमिदम्। उदाहरणम्–भोग्यविषयाः सुखस्वरूपाः। भावात्मकं मतमिदम्। अत एव विशेषदेशकालपरिस्थितिसापेक्षेण भोग्यविषयाः सुखस्वरूपाः। २)स्यान्नास्ति– अभावात्मकं मतमिदम्। यथा भोग्यविषयाः न सुखस्वरूपाः। ३)स्यादस्ति च नास्ति च– यदा कस्यापि वस्तुनः अस्तित्वमस्ति, नास्ति च। यथा– सिद्धार्थेन यथा उक्तम्– भोग्यविषयं सुखस्वरूपमस्ति, अपि वा सुखस्वरूपं नास्ति। ४)स्यादवक्तव्यम्– यदा परस्परविरूद्धमतवाद आगच्छति तदा वस्तुनः अस्तित्वमवक्तव्यम्। यथा– सिद्धार्थेन यथा उक्तम्– भोग्यविषयं सुखस्वरूपमपि च दुःखस्वरूपमपि। ५)स्यादस्ति च अवक्तव्यं च– कस्यापि वस्तुनोऽस्तित्वं स्यात् परंतु अवक्तव्यं भवति। सिद्धार्थेन यथा उक्तम्– विषया सुखसाधनानि भवन्ति, तथापि विषयाणां भोगसंज्ञा न तात्पर्यवहा । ६)स्याद् नास्ति च अवक्तव्यं च– कस्यापि वस्तुनोऽस्तित्वं न स्यात् परंतु अवक्तव्यं भवति। यथा—सिद्धार्थेन यथा उक्तम्– भोग्यविषयं सुखस्वरूपं नास्ति, अवर्णनीयं च भवति। ७)स्यादस्ति च नास्ति च अवक्तव्यं च—कस्या वस्तुनोऽस्तित्वं स्यात् न वा स्यात् परंतु अवक्तव्यं भवति। भोग्यविषयं सुखस्वरूपमस्ति, अपि वा सुखस्वरूपं नास्ति फलतो भावोऽस्पष्टो अवर्णनीयः च भवति।

वेदप्रामाण्यास्वीकाराद् जैनदर्शनं नास्तिकम्। जैनदर्शने अहिंसा मूलधर्मः। *बुद्धचरिते* त्रयोदशसर्गे सप्ततितमेन श्लोकेन—**ततः स संश्रुत्य च तस्य तद्वचो महामुनेः प्रेक्ष्य च निष्प्रकम्पताम्। जगाम मारो विमना हतोद्यमः हरैर्जगच्चेतसि यैर्विहन्यते**।। इत्यत्र दृश्यते कामदेवः सिद्धार्थस्य वचनं श्रुत्वा तथा तस्य स्थिरावस्थामवलोक्य सिद्धार्थोपरि पुष्पवाण-प्रयोगार्थमक्षमो भूत्वा तत्स्थानतो निरस्तोऽभूत्। जैनमते, मोक्षो मोहरहितावस्था, मनो-रहितावस्था,

निर्विकल्पावस्था, भावशून्यावस्था, सांसारिक-सुख-दुःखरहितावस्था, इन्द्रियविषय-रहितावस्था, जैनदर्शने मोहविजयद्वारा तथा मनोविजयद्वारा मनुष्यजन्मनः सार्थकता प्राप्यते। **सम्यग्दर्शन-ज्ञान-चरित्राणि मोक्षमार्गः**[2]। जैनमते जीवः स्वयमेव सुखदुःखकारणम्, पुनर्जन्म-बन्धन-मोक्षादिविषयाः जैनधर्मे स्वीकृताः। अहिंसा-सत्य-तपः एतानि धर्ममूलम्।

********

आकरनिर्देशः

---

[1] सर्व.सं.आ.द. ७५

[2] त.सू. १.१

## *बुद्धचरिते* बौद्धदर्शनविमर्शः

बौद्धचिन्तने तृष्णानाश-मैत्री-करुणा-मुदिता-उपेक्षा-निर्वाणेभ्यः सह सर्वजनसुखाय निखिल-दुःखमुक्तवे चेष्टा परिलक्षिता। *बुद्धचरिते* संवेगोत्पत्ति नामके तृतीयसर्गे यदवस्थात्रितयं वर्णितं तदालोक्य सिद्धार्थहृदये वैराग्यमुदितम्। तत्र अष्टविंशश्लोकेन सिद्धार्थो जरयाभिभूतं कुमारं दृष्ट्वा उक्तमेवम्—**क एष भोः सूत नरोऽभ्युपेतः केशैः सितैर्यष्टिविषक्तहस्तः।उवाच सङ्ग्राहकमागतास्थस्तत्रैव निष्कम्पनिविष्टदृष्टिः**॥....इत्यत्र बौद्धदर्शनाधारभूतः सिद्धान्तः संसारः दुःखसम्पृक्तः। दुःखसिद्धान्ते आधारभूतं प्रथमकारणं जरा। त्रिंशत्तमेन श्लोकेन रथवाहक उवाच... **रूपस्य हन्त्री व्यसनं बलस्य शोकस्य योनिर्निधनं रतीनाम्। नाशः स्मृतीनां रिपुरिन्द्रियाणामेषा जरा नाम ययैष भग्नः**॥ द्वितीयकारणं रोगः। एकचत्वारिंशत्तमेन श्लोकेन उक्तम्--- **स्थूलोदरः श्वासचलच्छरीवः स्रस्तांसबाहुः कृशपाण्डुगात्रः। अम्बेति वाचं करुणं ब्रुवाणः परं समाश्रित्य नरः क एषः**॥ एतदवलोक्य सिद्धार्थोऽवदत्**... इदं च रोगव्यसनं प्रजानां पश्यंश्च विश्रम्भमुपैति लोकः। विस्तीर्णमज्ञानमहो नराणां हसन्ति ये रोगभयै-रमुक्ताः**॥ तृतीयकारणं मृत्युः। तत्र सप्तपञ्चाशत्तमेन श्लोकेन उक्तम्—**बुद्धीन्द्रियप्राणगुणैर्वियुक्तः सुप्तो विसंज्ञस्तृणकाष्ठभूतः। संवर्ध्य संरक्ष्य च यत्नवद्भिः प्रियप्रियैस्त्यज्यत एष कोऽपि**॥ उपर्युक्त कारणत्रितये बौद्ध-प्रस्थानस्य प्रथमः सिद्धान्तः संसारो दुःखमयम्। बौद्धदर्शने चत्वारि आर्यसत्यानि विद्यन्ते। दुःखम्, दुःख समुदयम्, दुःख निरोधः,दुःख निरोध मार्गः च।

इदं सर्वं दुःखं, दुःखायतनं दुःखयाधनं च इति भावयित्वा तन्निरोधोपायं तत्त्वज्ञानं संपादयेत्। अत एवोक्तं दुःखसमुदायनिरोधमार्गास्चत्वार आर्यबुद्धस्याभिमतानि तत्त्वानि। तत्र दुःखं सुप्रसिद्धम्। समुदायो दुःखकारणम्। तद् द्विविधं—प्रत्ययोपनिबन्धनो हेतूपनिबन्धश्च। यथा बीजहेतुरङ्कुरो धातूनां षण्णां समवायाज्जायते। तथागतानां बुद्धानां मते धर्माणां कार्यकारणरूपाणां या धर्मता कार्यकारणभावरूपा, एषा उद्पादादनुत्पादाद्वा स्थिता। यस्मिन् सति यदुत्पद्यते, यस्मिन्नसति यन्नोत्पद्यते तत्तस्य कारणस्य कार्यम्। प्रतीत्यसमुत्पादतत्त्वोपरि द्वितीयार्यसत्यं प्रतिष्ठितम्। दुःखकारणोच्छेदे दुःखस्यापि उच्छेदो भवति। *बुद्धचरिते* द्वादशसर्गे दृश्यते ध्यानपरायणो जितेन्द्रियः पुरुषः अवगम्यते संसारः कदलीवृक्षसदृशः सारहीनः। सिद्धार्थः अपश्यद् दुःखस्य कारणं जन्म । जन्मनः कारणं भवागमनम्। अष्टपञ्चशत्तमेन श्लोकेन... **ततो दध्यौ भवस्यास्य कारणं यत्नवान् मुनिः। उपादाने ददर्शासौ भवकारणम्**॥ उपादानं किम्, जीवनस्य विविधं व्रतं, शीलं, कर्म च इति उपादानम्। स योगी कारणमपश्यत् तृष्णा एव उपादानकारणम्। सिद्धार्थेन षष्टितमेन श्लोकेन... **उपादानमिदं केन हेतुना चात्र जायते। इति चिन्तयता तेन तृष्णैव ददृशे पुरः**॥

तृष्णायुक्तं कर्म हि भवबन्धनकारणम्। एकषष्टितमेन श्लोकेन... **तृष्णायुतः कामः कर्मारण्ये विवधर्ते**। अतः तृष्णा कथं निवारणीया, तस्याः कारणं किम्, वेदना एव तृष्णायाः कारणम्.. **ततो ध्यानपरः सम्यक् कारणं वेद वेदनाम्**। व्यक्तिः वेदनया आकृष्टो भूत्वा तृप्त्यर्थं प्रयतते। वेदनायाः कारणं तु स्पर्शः..**स्पर्शेषु वेदनास्रोतो ददर्श वेदनान्तकः**। स्पर्शः किम्.. **अक्षवस्तुमनोयोगः स्पर्श इत्यभिधीयते**। अरणेः यथा अग्नेरूत्पत्तिः, तथा स्पर्शाद् वेदनोत्पत्तिः। स्पर्शस्य कारणं किं... षडायतन-संयोगः। षडायतन इत्यस्य कारणं किम्.. लोकवेत्ता स योगी अवदत्... अष्टषष्टितमेन श्लोकेन ... **ततः षटकस्य तत्त्वज्ञ आयतनस्य कारणम्। नामरूपे विवेदासौ चिन्तनं सततं धिया**।। अङ्कुरस्य विद्यमाने यथा पत्राणां शाखानां च उद्गमः तथा नाम-रूपयोः अस्तित्वे षडायतनोद्गमः। नामरूपयोः कारणं विज्ञानम् सप्ततितमेन श्लोकेन.. **ततश्च स पुनर्दध्यौ कारणं नामरूपयोः। ज्ञानपारङ्गतोऽपश्यद्विज्ञानं मूलमास्थितम्**।। नामरूप-विज्ञानयोः आश्रय-आश्रितसम्बन्धः। अत एव स्पर्शात् तु वेदनाजन्म वेदनायाः तृष्णा प्रजायते। तृष्णाया उपादानं, उपादानात् च भवोद्भवः। भवाद् जन्म, जन्मनो जरा-मरणम्, अत एव जन्मनाशद्वारा जरामृत्य्वोः नाशः, तथा भवनाशद्वारा जन्मनाशो भवति। यदि उपादानं निरूद्धं भवति, क्षणात् तृष्णारोधो भवति, वेदनायां विनष्टायां तृष्णास्तित्वं न विद्यते। स्पर्शस्य स्पष्टरूपेण नष्टद्वारा वेदना तिरोहिता भवति, तथा षडायतनस्य सम्यग्रूपेण नाशद्वारा स्पर्शो विलीनो भवति। नामरूपयोः निरोधात् षडायतनस्य क्षयो भवति, विज्ञाननिरोधात् नामरूपयोः नष्टो भवति। संस्कारस्य निरोधाद् विज्ञाननिरोधो भवति। अविद्यापगमात् संस्कारः क्षीणो भवति एवं ज्ञात्वा बुद्धो भूत्वा बहिरागतः। षडशीतितमेन श्लोकेनोक्तम्... **अविद्यापगमे सम्यक् संस्कारः क्षीयतेऽखिलः। इति ज्ञेयं विदित्वाऽसौ बुद्धो भूत्वा विनिर्ययौ**।। अविद्या-संस्कार-विज्ञान-नामरूप-षडायतन-स्पर्श-वेदना-तृष्णा-उपादान-भव-जाति-जरामरणानि एवं कार्य-कारणशृङ्खलस्य द्वादश-अङ्गानि द्वादशनिदानं भवचक्र इति आख्यायते।

**दुःखनिरोधः** तृतीय आर्यसत्यं इह जगति यद् उत्पत्तिमत् तत्तद् विनाशशीलम्। नैयायिकमते यत् कृतकं तदनित्यम्। बौद्धमते अविद्या दुःखस्य मूलम्। अविद्यानाशे दुःखनाशः। न्यामते कारणापाये कार्यापायः। तृतीय-आर्यसत्यद्वारा उद्घोषितं दुःखनिवृत्तिः सम्भवपरा। दुःखस्य निरवशेषनिवृत्तिः निर्वाणः इति। निर्वाणः स्वप्रत्यात्मवेदनीयः। केवलं सिद्धपुरुषाः अन्तःकरणे निर्वाणोपलब्धेः सक्षमाः। प्रवृत्तिमुखीभावनां दूरीकृत्य तृष्णाजनितां वासनां नियम्य सत्यानुसन्धान-द्वारा आत्यन्तिक-निवृत्तिः सम्भवा।

**दुःखनिरोधमार्गः** दुःखस्य आत्यन्तिक-निवृत्तेरुपायसमूहः। चतुर्थ-आर्यसत्ये अष्टाङ्गिक-मार्गस्योपदेशः प्रदीयः। चतुर्दशसर्गे सप्ताशीतितमेन श्लोकेन... **आष्टाङ्गिकेन मार्गेण परमां शान्तिमाययौ**। सम्यग्दृष्टिः—सम्यग्दृष्टिः यथार्थज्ञानं सूचयति। अविद्याच्छन्नो जीवो मिथ्यादृष्टि-प्रभावाद् असारः सारः, सारः च असार इति अवगम्यते। मिथ्यादृष्टिरेव संसार-निदानम्। न्यायमते, सम्यग्दृष्टिः इति स्थाने तत्त्वज्ञानस्योल्लेखः प्राप्यते। सम्यक् संकल्पः—संकल्पं विना महत् कर्म असम्भवम्। मन एव संकल्प-विकल्पात्मकम्। शिवसंकल्पसूक्ते, **तन्मे मनः शिवसंकल्पमस्तु**[1]। सम्यग् वाक्—संकल्पपूरणार्थं वाकसंयमोऽपरिहार्यः। अनृतभाषणं न करणीयम्। उपनिषदि उक्तम्—**मनो मे वाचि प्रतिष्ठितम्**[2]। सम्यक् कर्मान्तः—संकल्पसिद्ध्यर्थं न केवलं वाक्संयमः, अपि तु न्यायाचरणमपि विधेयम्। बुद्धमते, सम्यक् कर्मान्त एव पञ्चशील इति। तद्यथा—अहिंसा-अस्तेय-ब्रह्मचर्य-सत्यपालन-मादकवर्जनानि इति। सम्यग् आजीवः—पञ्च-शीलामाश्रित्य वासनाशून्यहृदये जीविकानिर्वाहः कर्तव्यः। सम्यग् व्यायामः—असत्चिन्तनं दूरीकरणाय शरीरचर्चाया उपादेयता विद्यते। सम्यक् स्मृतिः-- मोक्षाभिलाषिणा एकाग्रचित्तेन जगतोऽनित्यता मननीया। सम्यक् समाधिः—सर्वशेषस्तर एव। उपर्युक्त मार्गसप्तकस्य यथार्थानुसरणकारी सत्यकामो निरन्तरं प्रज्ञानुशीलनद्वारा अन्तिममार्गे उत्तीर्णो भवति।

चतुर्थसर्गे संसारस्य अनित्यताज्ञाने सिद्धार्थहृदये कामं प्रति रतिर्विगता। तत्र षडशीतितमेन श्लोकेन उक्तम्—**जरा व्याधिश्च मृत्यश्च यदि न स्यादिदं त्रयम्। ममापि हि मनोज्ञेषु विषयेषु रतिर्भवेत्। अनित्यतां सर्वगतां विचिन्तयन्** इत्यत्र अनित्यताज्ञाने बौद्ध-क्षणभङ्गवादः इति सिद्धान्तः परिपुष्टः। क्षणभङ्गः क्षणेन एकक्षणेन भङ्गः, जगत् सदा परिवर्तनशीलम्। यत् सत् तत् क्षणिकम्। सत् अर्थक्रियाकारित्वं कार्योत्पादनसामर्थकत्वं वा। तत्र क्षणिकत्वं नीलादिक्षणानां सत्त्वेन अनुमातव्यंयम—यत् सत् तत् क्षणिकं,यथाजलधरपटलं, सन्तश्चामी भावा इति। न चायमसिद्धो हेतुः, अर्थक्रियाकारित्वलक्षणस्य सत्त्वस्य नीलादिक्षणानां प्रत्यक्षसिद्धत्वात्। सर्वं शून्यं शून्यमिति भवनीयम्। सप्ने जागरणे च मया दृष्टमिदं रजतादि इति विशिष्टनिषेधस्योपलम्भात्। प्रतित्यसमुत्पादनीतेः अनिवार्य परिणतिः शून्यवादः।

अष्टमसर्गे सिद्धार्थस्य अन्तःपुरत्यागे तथा तपोवनप्रवेशे शाक्यराज्ये कपिलावस्तुनगर्य्यां शोकच्छाया परिलक्षिता। यशोधरायाः पतिविरहे उन्मत्तदशा, गौतमीमातुः पुत्रशोकातुरा दशा, राज्ञः शुद्धोदनस्य शोकविह्वलदशा इत्यादिविषयानां समावेशेन परिपुष्टं बौद्धदर्शनस्य सिद्धान्तः संसारो दुःखमयः। बौद्धदर्शने आत्मा प्रत्याख्यातः। अराडस्य सांख्याश्रितमतद्वारा तथा वेदान्ताश्रित-मतद्वारा सिद्धार्थो न तृप्यते। **आत्मैवेदं सर्वम्**[3] इति औपनिषदिकसिद्धान्तस्य विरुद्धमतवादो

नैरात्मवादः बुद्धेन प्रतिष्ठितः। अत एव अराडेन आत्माश्रित्य मोक्षलाभमतं सिद्धार्थेन प्रत्याख्यातम्। बौद्धमते क्षणिकसन्ततिरूपस्य आत्मनो मुक्तिः प्रदीपनिर्वापितवत्। आत्मनः सम्पूर्णरूपेण विनाश एव मुक्तिः। तदेव निर्वाणम्, सर्वं क्षणिकं, सर्वं शून्यम् इति।

********

आकरनिर्देशः

---

[1]शुक्लयजुर्वेदः ३४.१

[2]ऐ.उप. शान्तिपाठः

[3]छा.उ. ७.२५.२

## *बुद्धचरिते* आत्मतत्त्वखण्डनम्

*बुद्धचरिते* द्वादशतमसर्गे दृश्यते अराडमुनिना सिद्धार्थसमीपे आत्मविषयकतत्त्वं व्याख्यातम्। आत्मा तदेव ब्रह्म मोक्षतत्त्वम् इत्युल्लिखितम्। यस्य संज्ञा चेतना वा अस्ति, क्षेत्रं तथा देहसम्पर्कित-ज्ञानं यस्य अस्ति स एव क्षेत्रज्ञः। आत्मचिन्तकाः आत्मानं क्षेत्रज्ञ इति कथयन्ति। अज्ञानं, कर्म, तृष्णा च संसारहेतवः। क्षेत्रज्ञः पुरुषः प्रतिबुद्ध-अप्रतिबुद्ध-व्यक्तं-अव्यक्तरूप-चतुष्टयज्ञानं सम्यकरूपेण ज्ञात्वा जन्ममरण-बन्धनाद् निष्क्रम्य अक्षयपदं ब्रह्म प्राप्नोति। ब्रह्मवादिनो ब्राह्मणा भवसागरे ब्रह्मचर्यं पालयन्ति। कामेभ्यो विरक्तो भूत्वा विवेकी स पुरुष ध्यानसुखं प्राप्य अपूर्वसुखलाभेन ह्रियते। कामद्वेषविरोधिना शमेनैव स ब्रह्मलोकमाप्नोति। । परंतु अपरो विद्वान् आकाशगतमात्मानं संक्षिप्य तमेव अनन्तरूपेण पश्यन् विशेषमधिगच्छति। द्वाषष्टितमेन श्लोकेनोक्तम्—**आकाशगतमात्मानं संक्षिप्य त्वपरो बुधः। तदेवानन्ततः पश्यन् विशेषमधिगच्छति**। अध्यात्मनिपुणः अन्यः जनः तु आत्मना आत्मानं निवर्त्य किंचित् नास्ति इति अनुपश्य आकिंचन्यरूपेण व्याख्यातः। त्रिषष्टितमेन श्लोकेनोक्तम्—**अध्यात्मकुशलस्त्वन्यो निर्वत्यात्मानमात्मना। किं चिन्नास्तीति संपश्यन्ना-किंचन्य इति स्मृतः**। यथा पिञ्जरात् पक्ष्मी बहिरागच्छति, तथा यदा देहादात्मा क्षेत्रज्ञो आत्मा वा निःसृतो भवति, तदा मुक्त इत्यभिधीयते। एतत् लिङ्गरहितं, ध्रुवम्, अक्षरं, निर्गुणात्मा, परमं ब्रह्म–यत् मोक्ष इति तत्त्वज्ञैः कथ्यते।

अराडस्य तद्वाक्यमवधार्य विचार्य च स सिद्धार्थः पूर्वजन्मसुकृति-प्राप्तिवशात् प्रत्युत्तरेण उवाच—भवतः इदं मङ्गलमयं सूक्ष्मं ज्ञानं मया श्रुतं परंतु आत्मनः अपरित्यागाद् एतद् नैष्ठिकं न मन्यते। नवषष्टितमेन श्लोकेन सिद्धार्थेन उक्तम्—**श्रुतं ज्ञानमिदं सूक्ष्मं परतः परतः शिवम्। क्षेत्रज्ञस्यापरित्यागाद-वैम्येतदनैष्ठिकम्**।। विकारप्रकृतेभ्यो मुक्तमात्मानम् अहं प्रसवधर्मयुक्तं तथा बीजधर्मयुक्तं मन्ये। यद्यपि आत्मा विशुद्धो निर्मुक्त इति कल्प्यते, परंतु समवायिकारणविद्यमानाद् अमुक्तः बद्ध इति भविष्यति। ऋतु-भूमि-अम्वुविरहात् यथा बीजं न रोहति,तथा आत्मापि इति सिद्धार्थस्योक्तिः। यतः कर्माज्ञानमोहत्यागात् मोक्षो भवति ततः आत्मनो विद्यमानात् कर्माज्ञान-मोहानां आत्यन्तिकः परित्यागः न सम्पद्यते। त्रिसप्ततितमेन श्लोकेन उक्तम्—**यत्कर्माज्ञानतृष्णानां त्यागान् मोक्षश्च कल्प्यते। अत्यन्तस्तत्परित्यागः सत्यात्मनि न विद्यते**।। अपि च चतुःसप्ततितमेन श्लोकेन—**हित्वा हित्वा त्रयमिदं विशेषस्तूपलभ्यते। आत्मनस्तु स्थितिर्यत्र तत्र सूक्ष्ममिदं त्रयम्**।। दोषाणां सूक्ष्मत्वात् चेतसो निष्क्रियत्वात् च आयुषश्चैव दीर्घत्वात् च मोक्षः परिकल्प्यते। सति आत्मनि अहंकारस्य परित्यागो न विद्यते। संख्यादिभिः अमुक्तः आत्मा निर्गुणो न भवति, अतः असति नैर्गुण्ये आत्मनो मोक्षो न अभिधीयते। देहात् प्राग् देही न भवेत्, गुणेभ्यः प्राग्

गुणी न भवति, तस्मात् शरीरधारणात् प्राक् मुक्तः अपि स शरीरधारी आत्मा पुनर्बद्धो भवति। आत्मा यदि शरीरहीनो भवति तर्हि ज्ञाता ज्ञेयो वा भविष्यति। यदि ज्ञाता तर्हि ज्ञेयस्य प्राप्तिः, ज्ञेये सति आत्मा न मुच्यते। उक्तमेव—**क्षेत्रज्ञो विशरीरश्च ज्ञो वा स्यादज्ञ एव वा। यदि ज्ञो ज्ञेयमस्यास्ति ज्ञेये सति न मुच्यते**।। अपि च **अथाज्ञ इति सिद्धो वः कल्पितेन किमत्मना। विनापि ह्यात्मज्ञानं प्रसिद्धं काष्ठकुड्यवत्**।। यतः उत्तरोत्तरत्यागात् गुणवान् इति मन्यते, ततः सर्ववस्तुपरित्यागात् अर्थाद् आत्मापरित्यागे एव सार्विक-चरितार्थता। द्व्यशीतितमेन श्लोकेन उक्तम्—**परतः परतस्त्यागो यस्मात्तु गुणवान् स्मृतः। तस्मात् सर्वपरित्यागान्मन्ये कृत्स्नां कृतार्थताम्**।। इति अराडस्य धर्मं विदित्वा न तुष्टो भवति सिद्धार्थः। अकृत्स्नमिति विज्ञाय ततः प्रतिजगाम।

उत्कृष्टज्ञानलाभार्थं सिद्धार्थः उद्रकाश्रमं ययौ। परंतु तत्रापि आत्मस्वीकारात् उद्रकदर्शनमपि सिद्धार्थेन त्यज्यम्। उद्रकमुनिः संज्ञासंज्ञित्वयोः दोषं ज्ञात्वा आकिंचनात् परं संज्ञासंज्ञारहिततत्त्वं ज्ञातवान्। यतः बुद्धिः तत्रैव स्थित्वा अन्यत्र अप्रचारिणी अतः तत्र न असंज्ञित्वं न च संज्ञिता। अष्टाशीतितमेन श्लोकेन उक्तम्—**यस्माच्च तदपि प्राप्य पुनरावर्तते जगत्। बोधिसत्त्वः परं प्रेप्सुस्तस्मादुद्रकमत्यजत्**।। नैरात्मवादी भगवान् बुद्धः। आत्माश्रित्य अराडमतं तथा उद्रकमतं सिद्धार्थेन प्रत्याख्यातम्। आत्मास्वीकारात् बौद्धैः सामान्यं प्रत्याख्यातम्। तैः अपोहवादः स्वीकृतः।

चतुर्दशसर्गे दृश्यते सिद्धार्थः सर्वेषु ध्यानविधिषु उत्तमम् ऐश्वर्यं प्राप्य प्रथमे यामे पुर्वजन्मपरंपरां सस्मार। तासु तासु उपपत्तिषु जन्म मृत्युं च स्मृत्वा स करुणात्मकः सत्त्वेषु कारुण्यं चकार।अविद्या-संस्कार-विज्ञान-नामरूप-षडायतन-स्पर्श-वेदना-तृष्णा-उपादान-भव-जाति-जरामरणानि एवं कार्य-कारणशृङ्खलस्य द्वादशाङ्गानि द्वादशनिदानं भवचक्रं ज्ञात्वा बुद्धो भूत्वा विनिर्ययौ। लोकेषु अन्तरं तथा बाहिरं कुत्रापि आत्मानं स न अपश्यत्। सप्ताशीतितमेन श्लोकेन उक्तम्—**नान्तर्बहिश्च लोकेषु त्वात्मानं दृष्टवान् क्वचित्। आष्टाङ्गिकेन मार्गेण परमां शान्तिमाययौ**।।

बृहदारण्यकोपनिषदि चतुर्थाध्यायस्य चतुर्थब्राह्मणे कदा देहान्तरप्राप्तिः कस्य वा कथं वा इति प्रश्ने याज्ञवल्क्येन विस्तरशः प्रतिपद्यते। मरणकाले उपस्थिते जीवात्मा दौर्बल्यं संमोहं च प्राप्य निर्गच्छति। देहस्य एव दौर्बल्यं संमूढता च, परंतु आत्मनः दौर्बल्यादयः औपचारिका। आत्मा स्वतः अमुर्तत्वात् कथमपि न अबलभावं गच्छति। न च अस्य स्वतः संमोहो नित्यचैतन्यज्योतिः-स्वभावात्। विवेकाभावो हि संमोहः। देहस्य उत्क्रमणकाले एते प्राणाः वागादयः आत्मानम् अभिगच्छन्ति। तदा जीवात्मा देहस्थितेभ्यः अङ्गेभ्यो विमुच्य देहस्थितानि इन्द्रियाणि संगृह्य च हृदयाकाशे सविज्ञानो भवति। तेजोमात्राः चक्षुरादीनि रूपादिप्रकाशनशक्तिमत्त्वात् सत्त्वप्रधान-भूतकार्सत्त्वाच्च। चक्षुरादीनि इन्द्रियाणि जीवात्मना निर्लेपेन गृहीतानि। स्वप्ने तु निर्लेपेन सम्यगादानं

न भवति। जाग्रदवस्थायां चक्षुरादीनां पुनः क्रियायुक्तत्त्वादित्यर्थः। निष्क्रियस्य आत्मनः तेजमात्रादानकर्तृत्वमौपचारिकम्। मरणकाले चक्षुषः रूपादिप्रकाशन-शक्तिर्नश्यति। यावज्जीवदेहो वर्तते तावदेव चक्षुरादीनि इन्द्रियाणि सानुग्रहाणि। देहस्य विनाशे चक्षुषः अधिष्ठात्री देवता आदित्यलोके प्रत्यावर्तते। तदा दृष्टिशक्तेरभावाद् मुमूक्षुः रूपं न जानाति।

लोकान्तरगमनकाले इन्द्रियनिचयो लिङ्गात्मना एकीभवति। देहपातानन्तरं चक्षुर्देवता आदित्यलोके प्रत्यावर्तते। तदा मुमूक्षः न पश्यति दृष्टिशक्तेर्व्यापाराभावात्। घ्राणदेवतानिवृत्तौ मुमुक्षुः न जिघ्रति। एवं जिह्वादेवतानिवृत्तौ रसास्वादनं न करोति, वाग्देवतानिवृत्तौ न कथयति, मनोदेवता-निवृत्तौ न चिन्तयति, त्वग्देवतानिवृत्तौ न स्पृशति, बुद्धिदेवतानिवृत्तौ न विजानाति। सर्वेन्द्रियाणां हृहयाकाशे लिङ्गात्मना एकीभावो भवति। हृदयाकाशस्य अग्रभागः आत्मचैतन्य-ज्योतिषा दीप्यते। ननु केनैव मार्गेण विज्ञानमरः लिङ्गात्मा निर्गच्छति लोकान्तरगमनाय, इत्युच्यते—आदित्यलोक-प्राप्तिनिमित्तं चक्षुषः, ब्रह्मलोकप्राप्तिनिमित्तं मूर्ध्नोः, लोकान्तरप्राप्ति-निमित्तम् अन्येभ्यः शरीराङ्गेभ्यो वा लिङ्गात्मनः बहिर्गमनं सूच्यते।

उत्क्रमणकाले लिङ्गात्मा सविज्ञानो भवति। स्वप्ने यथा ज्ञानवान् भवति तथैव, परन्तु मुमूर्षोः कर्मणि किमपि स्वातन्त्र्यं नास्ति। यद्भावेन भावितं तेनैव लोकान्तरम् आस्थितम् इति कर्मपरतन्त्रो हि सः, **पुण्यो वै पुण्येन कर्मणा भवति, पापः पापेन**[1] इत्युक्तेः। परलोकाय निर्गच्छन्तं जीवात्मानम् अनुगच्छन्ति विद्याप्रज्ञाकर्माणि। विहिता विद्या ध्यानात्मिका, प्रतिषिद्धा विद्या नग्नस्त्रीदर्शनादिरूपा, अविहिता विद्या घटादिविषया, अप्रतिषिद्धा विद्या पथि पतिततृणादिविषया। विहितं कर्म यागादि, प्रतिषिद्धं कर्म ब्राह्मणहननादि, अविहितं कर्म गमनादि, अप्रतिषिद्धं कर्म नेत्रपक्ष्मविक्षेपादि। पूर्वप्रज्ञा अतीतकर्मफलानुभववासना। जीवात्मा यदा लोकान्तरं गच्छति तदा पूर्वानुभवसंस्कारेणैव अभ्यासमन्तरेणापि लोकान्तरे तस्य कर्मणि कुशलता दृश्यते। पूर्वप्रज्ञा आत्मनः फलोपभोगे प्रवृत्तिं जनयति। अभीष्टकर्मणा एव अभीष्टफलभोगो भवति। अतः परलोकगमनाय जनैः योगोभ्यासो विशिष्टपुण्योपचयश्च कर्तव्यः। चित्तवृत्तिनिरोधरूपयोगाभ्यासेनैव अनर्थो निवर्तिष्यते। अनर्थस्य उपशमाय उपनिषदः उपनिबद्धाः। उक्तमेव—**तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुष्टो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरेभ्यस्तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनुत्क्रामन्तं सर्वे प्राणा अनुत्क्रामन्ति सविज्ञानो भवति सविज्ञानमेवान्ववक्रामति। तं विद्याकर्मणि समन्वारभेते पूर्वप्रज्ञा च**[2]।

आत्मतत्त्वविवेके उदयनाचार्यो दुःखं जिहासवः, तत्त्वज्ञानमेव तदुपायम् इति वाक्यांशद्वारा दुःखहानं शास्त्रस्य मूलप्रयोजनत्वेन उपन्यस्यति। अपि च मूलप्रयोजनोपायरूपेण आत्मतत्त्वज्ञानं

गौणप्रयोजनम्। इह जगति यदि दुःखं प्रतिकूलं न स्यात् यदि वा न प्रमाणसिद्धं ततो न सर्वेषां जिहासितं न स्यात्। दुःखं हि निसर्गतः एव प्रतिकूलस्वभावम्, अत्र स्वभावशब्देन दुःखं सत्त्वामात्रेण प्रतिकूलं न किंचित्कारेण वस्त्वन्तरवदिति दुःखस्य लक्षणं सूचितम्, सर्वजनसम्वेदनात्मकं प्रमाणसिद्धं च। सर्वजनसम्वेदन-सिद्धं सर्वेषामनुभवसिद्धं, न तु असत् यद्यपि बौद्धमते सर्वं क्षणिकं तथापि दुःखसत्त्वात् तन्निवृत्तिः पुरुषार्थः। बौद्धमते, सर्वं क्षणिकं ज्ञानस्वरूपमात्मापि क्षणिकम्। अभावविषयकज्ञानं प्रति प्रतियोगिज्ञानस्य कारणत्वे प्रतियोगिज्ञानस्वीकारत्वाद् आत्मनः अस्थिरत्वज्ञाने तद्स्थिररूपप्रतियोगि-ज्ञानापेक्षितत्वात् आत्मतत्त्वनिरूपणे आत्मा ज्ञातव्यः। नैयायिकमते, आत्मा देहादिभ्यो भिन्नः एवं विवेकज्ञानं प्रति अनुयोगिरूपेण आत्मनः ज्ञानं कारणम्। अतो बौद्धमते प्रतियोगिरूपेण, न्यायमते अनुयोगिरूपेण आत्मतत्त्वं ज्ञातव्यम्।

तदुपायं दुःखहानोपायमिति।पुरुषार्थसाधनत्वादात्मतत्त्वविवेकोऽपि पुरुषार्थ एव। ननु दुःखाभावो न पुरुषार्थः। सुखोपाधिप्रयुक्तेच्छाविषयत्ताद् इत्यत आह निसर्ग इति निरूपाधिद्वेषविषयमित्यर्थः। दुःखे मानमाह सर्वजनेति। तत्त्वज्ञानं तत्सहितसामग्रीपरं तेन तत्तवज्ञानसमवहितसामग्रीत एव दुःखहानमित्यर्थः। उक्तम् च—**इह खलु निसर्गप्रतिकूलस्वभावं सर्वजन-सम्वेदनसिद्धं दुःखं जिहासवः सर्व एव तद्धानोपायमविद्वांसोऽनुसरन्तश्च सर्वाध्यात्म-विवेकवाक्यतया तत्त्वज्ञानमेव तदुपायमाकर्णयन्ति, न ततोऽन्यत्**[3]**।**

बौद्धमते, आत्मा न स्थायी यद्यपि पारमार्थिकसत्यत्वमस्ति। स्थायी आत्मा नास्ति इति चिन्ता मोक्षहेतुः। नैरात्मचिन्ता आत्मनोऽभावविषयकदृढधारणा सुखभोगाकाङ्खां दूरीकरोति। वासना एव बन्धनकारणम्। वासनाभावे विहिताविहितकर्माभावः, तदभावे धर्माधर्माभावः,एतेन जन्माभावः, जन्माभावे च दुःखाभावः। अतो नैरात्म्यचिन्ताद्वारा आत्मा क्षणस्थायी असद् इति दृढीभवति। आत्मनोऽभावविषयकज्ञाने प्रतियोगिज्ञानं कारणम्। आत्मा एव प्रतियोगी। आत्मनोऽभावज्ञानत्वे प्रतियोगिरूपेण आत्मज्ञानं कारणम्। अतः प्रतियोगितया आत्मा एव तत्त्वतो ज्ञेयः। अत्र आत्मनो-अभावज्ञानं प्रति प्रतियोगिभूतम् आत्मज्ञानं न तु सविकल्पकम्। आत्मविषयकनिर्विकल्पकज्ञानमेव तत्त्वज्ञानम्। बौद्धमते निर्विकल्पकज्ञानं सद्विषयकम्। अतः प्रतियोगिरूपेण आत्मनो निर्विकल्पक-ज्ञानमेव तत्त्वज्ञानम्। निर्विकल्पकज्ञानात्परं सविकल्पकं ज्ञानम्।

अत्र तु न्यायवैशेषिकमते, अनुयोगितया चात्मैव तत्त्वतो ज्ञेयः। ते देहेन्द्रियेभ्यो व्यतिरिक्त उत्पत्तिविनाशरहित आत्मनः अस्तित्वं स्वीकरोति। देहेन्द्रियमनविषयेभ्यो विविक्तरूपेण आत्मज्ञान-द्वारा आत्मविषयकमिथ्याज्ञानापाये मुक्तिर्भवति। **आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्च**[4] इति श्रुतिवाक्यद्वारा शाब्दज्ञानपूर्वकम् आत्मा देहेन्द्रियेभ्यो भिन्नः इति

मननात्मकम् आत्मानुयौगिकम् इतरभेदज्ञानम्। ततःपरं निदिध्यासनद्वारा आत्मसाक्षात्कारो भवति। न्यायमते, अहं गौरः इति ज्ञानमनादिकालसञ्चितत्त्वाद् देहात्मनोऽभेदजनितवासनोद्भूतत्वाद् अतत्त्वज्ञानम्। मुमुक्षुरेव अधिकारी।

ननु नैसर्गिकाहंप्रत्ययेन ज्ञात एवात्मा किमत्र ज्ञातव्यम् इत्याकाङ्खायामुच्यते यदि शरीरादिव्यतिरिक्तात्मनो नास्तित्वं यदि वा अस्तित्वमोभयथापि शरीरादिसंघातविषयो नैसर्गिकः अहंप्रत्ययः तर्हि न आत्मनस्तत्त्वज्ञानं व्यतिरिक्तस्य सत्त्वासत्त्वयोः उदासीनत्वातद् आत्मा एव तत्त्वतो ज्ञेयः इत्यत्रापि एकवाक्यता एव वादिनाम्। अतो दुःखस्य जिहासितत्वात् तद्धानोपायं चात्मतत्त्वज्ञानमन्तरेण अन्यस्याभावाच्च तत्सिद्ध्यर्थम् आत्मतत्त्वं विविच्यते। उक्तमेव— **प्रतियोग्यनुयोगितया च आत्मैव तत्त्वतो ज्ञेयः। तथाहि—यदि नैरात्म्यं, यदि वात्मास्ति वस्तुभूतः, उभयथापि नैसर्गितमात्मज्ञानमतत्त्वज्ञानमेव इत्यत्राप्येकवाक्यतैव वादिनामत आत्मतत्त्वं विविच्यते[5]।**

आत्मनोऽभावपक्षे क्षणभङ्गवादिनां मते, प्रथमक्षणे उत्पन्ने सति परक्षणे विनश्यति। अनित्यता एकमेव ध्रुवः। दृश्यमान वस्तु वस्तुसन्तानः। वस्तु सदा परिवर्तनशीलम्। क्षणभङ्गः क्षणेन एकक्षणेन भङ्गः, वस्तुनिचयः प्रतिक्षणे परिवर्तते। यत् सत् तत् क्षणिकम्। सत् लक्षणम्—अर्थक्रियाकारित्वं कार्योत्पादनरूपसामर्थ्यवत्त्वम्। उद्देश्यसिद्धिरेव क्रियास्वरूपम्। बीजम् एकमेव सद्वस्तु, अस्य बीजस्य सत्तावशाद् बीजम् अङ्कुरोत्पादनरूपार्थक्रियाकारित्वस्य सामर्थ्ययुक्तम्। असद्वस्तु अर्थक्रियाकारि न। यथा- गगनारविन्दः। कस्मिन् द्रव्ये अर्थक्रियाकारित्वं सम्पद्यते क्रमेण तथा अक्रमेण। यदि क्रमेण वर्तते तर्हि एतत् स्वीकार्यं तत् न स्थायि, यतः क्रम इत्यस्यार्थः प्रतिक्षणेन भिन्नता। यस्यानिवार्यपरिणतिः क्षणिकवादः। पुनः स्थायि वस्तु अक्रमेण न वतर्ते, कारणं कार्योत्पत्तेः परं कारणावस्थाया विनाशे सति वस्तु अस्थायि भवति। अत एव सर्वं क्षणिकं क्षणिकम्।

कस्य तत्त्वस्य स्थापनार्थं यथा साधकप्रमाणं वर्तते,तद्रूपं बाधकप्रमाणं खण्डनमपि वर्तते। प्रबलतरबाधकप्रमाणे सति शतसाधकप्रमाणवर्णनेऽपि वस्तुसिद्धिः न भवति। नैरात्मवादिनो बौद्धाः तथा वैदान्तिकाः न्यायवैशेषिकसम्मतस्य आत्मतत्त्वस्य विरोधिमतं स्वीकुर्वन्ति, तत् खण्डनार्थं बाधकप्रमाणरूपेण अत्र उपन्यस्यते। क्षणभङ्गः—सर्वं क्षणिकत्वविषयकप्रमाणं नैयायिकसम्मत आत्मनित्यत्वे बाधकम्। बाह्यार्थभङ्गः—ज्ञानातिरिक्तबाह्यवस्तुनः असत्ताविषयकं विज्ञानवादि-बौद्धमतम् इत्यस्य साधकप्रमाणम् नैयायिकाभिमतं ज्ञानातिरिक्तस्य ज्ञानाद्याश्रयरूपस्य आत्मवस्तुनः स्थापने बाधकम्। गुणगुणिभेदभङ्गः—बाह्यास्तित्ववादि बौद्धमते, गुणातिरिक्तो गुणी न विद्यते। इत्यत्र साधकप्रमाणं नैयायिकाभिमतं आत्मनो गुणाश्रयत्वं गुणाद् भिन्नम्। अद्वैतमते, गुणगुणिनोः

तादात्म्यं विद्यते। गुणगुणिनोऽभेदो वर्तते। अनुपलब्दिः—शरीराद्यतिरिक्त-आत्मनः अनुपलब्धिः अननुभववशाद् आत्मसिद्धिः न भवति। अनुपलब्धिद्वारा वस्तुनोऽभावः,अनुपलब्धिः आत्मनः स्वरूपसिद्धेः बाधकः। उक्तमेव—**तत्र बाधकं भवदात्मनि क्षणभङ्गो वा बाह्यार्थभङ्गो वा गुणगुणिभेदभङ्गो वा अनुपलम्भो वेति**[6]।

********

आकरनिर्देशः

---

[1]बृ.उप. ३.२.१३

[2]तदेव ४.४.२

[3]आ.वि. दुःखहानोपायत्वनिरूपणम्

[4]बृ.उप. ४.५.६

[5]आ.वि. दुःखहानोपायत्वनिरूपणम्

[6]तदेव आत्मनि बाधकचतुष्टयनिर्देशः

## *बुद्धचरिते* शान्तरसस्य दार्शनिकसमन्वयः

रसोत्पत्तिप्रसङ्गे नाट्यशास्त्रे भरतमुनिना रससूत्रमुक्तम् **विभाव-अनुभाव-व्याभिचारि-संयोगाद्रसनिष्पत्तिः**[1]। अत्र स्थायिभावेन इति पदमनुवर्तनीयम्। तेन रत्यादिस्थायिभावेन विभाव-अनुभावव्यभिचारिसंयोगाद् रसनिष्पत्तिरित्यर्थो निष्पन्नो भवति। शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानक-वीभत्स-अद्भुतानाम् एतेषामष्टरसातिरिक्तं नवमरसोऽस्ति स एव शान्तरसः। निर्वेद इत्यस्यार्थः द्रारिद्रम्, निर्वेदः शान्तरसस्य न स्थायिभावो, स्थायिभावो भवति शमः। भाव इत्यस्यार्थः अनुभूतिः। विरुद्धा अविरुद्धा च ये भावाः तिरोधातुमक्षमाः रसानुभवस्य मूलरूपं स स्थायिभावः। अस्माकं चित्तवृत्तेः कारणत्वेन विभाव उल्लिख्यते। काव्यनाट्ययोः रत्यादेः स्थायिनः कारणानि विभावाः। नाट्यशास्त्रे उच्यते– **विभावः कारणं निमित्तं हेतुरिति पर्यायाः**[2]। विभावश्च आलम्बनोद्दीपनभेदेन द्विविधः। रत्यादिस्थायिभावो यमवलम्ब्य प्रकाशते स एव आलम्वनविभावः। उद्दीपनविभावः स्थायिभावस्य उद्दीपनकारणम्। उद्रिक्तचित्तवृत्तिजन्यो बाह्यशारीर-विक्रियासमूहो हि अनुभावः। व्यभिचारिभावो हि अस्माकं चित्तवृत्तेरस्थायिभावसमूहः।

*बुद्धचरितं* शान्तरसप्रधानं महाकाव्यम्। *बुद्धचरिते* प्रथमसर्गे सिद्धार्थस्य भवितव्यमुक्तं यत् सिद्धार्थो बुद्धो भविष्यति, सिद्धार्थो मोक्षलाभार्थं वनमेव गच्छेत्, तत्त्वज्ञानं सम्यकरूपेणावगम्य सन्न्यासी भवेत्। तृतीयसर्गे जरा-मरण-रोगसम्पृक्तं जगदिदमवलोक्य सिद्धार्थहृदये वैराग्यमुदितम्। तदा सिद्धार्थहृदये तत्त्वज्ञानलाभार्थमिच्छा जागरिता। चतुर्थसर्गे दृष्टमन्तःपुर-रमणीनां कामलीला सिद्धार्थ-हृदये आसक्तिं न जनयामास। पञ्चमसर्गे दृश्यते विषयविमुखः सिद्धार्थः शान्तिलाभार्थं गृहत्यागमकरोत्। षष्ठसर्गे निश्रेयसज्ञानलाभार्थं सिद्धार्थो शान्त-परिवेशसम्बलितं भार्गवमुनेराश्रमं प्रविष्टवान्, ततःपरं निर्मलं तपोवनं प्रवेशयामास। सप्तमसर्गे दृश्यते तत्र आश्रमे स्वर्ग एव तपस्यायाः लक्ष्यं परंतु सिद्धार्थस्य लक्ष्यं पुनर्जन्मनिरोधः एव। अत एव जन्मनिरोधरूपं तादृशतत्त्वज्ञानलाभार्थं सिद्धार्थः अराडमुनेराश्रमं गन्तुमिच्छन् तपोवनं त्यजेत्। एकादशसर्गे सिद्धार्थस्य शान्तावस्थायाः परिचयः प्राप्यते। विषयः सिद्धार्थं प्रति नासक्तिं जनयति। स निर्विकारो आसीत्। सिद्धार्थहृदये न सुखं नापि दुःखमस्ति। द्वादशसर्गे अराडमुनेः मुखनिःसृततत्त्वज्ञानद्वारा सिद्धार्थो न परितुष्टः। त्रयोदशसर्गे दृश्यते कामदेवः सिद्धार्थस्य वचनं श्रुत्वा तथा सिद्धार्थस्य स्थिरावस्था अवलोक्य सिद्धार्थोपरि पुष्पवाण-प्रयोगार्थमक्षमो भूत्वा तत्स्थानतो निरस्तोऽभूत्। चतुर्दशसर्गे दृश्यते एकाधारे ध्यैर्य-शम-वैराग्य-एकाग्यतायाः प्रतिमुर्तिः सिद्धार्थः द्वादशनिदानरूपं भवचक्रनिदानकारणं ज्ञात्वा बुद्धो भूत्वा बहिरागत्य अष्टाङ्गयोगद्वारा परमा शान्ति प्राप्ता।

*बुद्धचरिते* अष्टमसर्गे करुणरसो यद्यपि दृश्यते तथापि *बुद्धचरिते* सर्वत्र एव शमप्रधान-शान्तरसस्य प्राधान्यम्। सिद्धार्थहृदये स्थायिरूपेण यो गुणः अनुभूतिर्वा वर्तते स एव शमः। यस्यार्थः वैराग्यरूपतत्त्वज्ञानलिप्सा। एवं स्थायिभाववशात् सिद्धार्थः कामनायां भवसागरे निरासक्तोऽभवत्। अपि च तृतीयसर्गे जरा-मरण-रोगरूप-उद्दीपनविभावः सिद्धार्थोपरि निर्वेदं जनयति। निर्वेदो वैराग्यं च समार्थकौ शब्दौ। निर्वेदो मनुष्यं पार्थिववस्तुनि तुच्छानीति प्रदर्श्य संसारविमुखं करोति। निर्वेदः स्थायिभावत्वेन तथा व्यभिचारिभावत्वेन व्यवह्रियते। सिद्धार्थस्य जन्मान्तरीयसंस्कारवशात् तत्त्वज्ञानरूपं वैराग्यमुदितम्। एकजन्मसंस्कारद्वारा कस्यापि मोक्षो न भवति, तदर्थमनेकानां जन्मानामभ्यासवैराग्येण प्रयोजनम्। सिद्धार्थहृदये तत्त्वज्ञानलाभार्थं संसारत्यागरूपसिद्धान्तस्य पश्चाते सिद्धार्थस्य जन्मान्तरीयसंस्कार एव कारणम्। जन्मान्तरवाद एव मृत्योः परं पुनर्जन्म। बुद्धत्वलाभस्य प्रथमयामे बुद्धो जातिस्मरोऽभवत्, तद्ज्ञानद्वारा बुद्धः पूर्वजन्मवृत्तान्तस्मरणे सक्षमोऽभवत्। रात्रेः द्वितीययामे जीवगतिपरम्पराविषयकं ज्ञानमलभत। जन्मनः परं सिद्धार्थो वक्तुमलम् त्रिपिटके एतदुल्लिखितम्... अहं ज्यैष्ठोऽस्मि, श्रेष्ठोऽस्मि, अयमन्तिमो जातिः।

तत्त्वज्ञानोत्थितो निर्वेद इति शमस्यैवेदं निर्वेदनाम कृतं स्यात्। शमशान्तयोः पर्यायत्वं तु हासहास्याभ्यां व्याख्यातम्। शान्तरसस्य स्थायिभावो भवति शमः। शमो नाम सर्वकर्मोपरमः, यद्वा ज्ञानम् आत्मतत्त्वज्ञानम् इति। तथा चोक्तं भगवद्गीतायाम्—**सर्वं कर्माखिलं पार्थज्ञाने परिसमाप्यते**[3]**।** आत्मज्ञानम् इति तत्त्वज्ञानम्। शान्तस्य समुत्पत्तौ तत्त्वज्ञानम् मूलम्। तत्र तत्त्वज्ञानं किं, तत्त्वज्ञानमेव आत्माविषयकज्ञानम्। शरीररूपिणि पिण्डे एव नित्यतत्त्वम् आत्मास्ति, किन्तु शरीरे तस्य सावधिकी उपस्थितिः नित्यत्वविषये शङ्कामुत्पादयति। मरणोत्तरं शरीरस्य चैतन्यशून्यताऽपि आत्मनोऽस्तित्वं शङ्कास्पदं विदधाति। अत आत्मनो नित्यता व्यापकता च सन्दिग्धा जायते। नित्यत्वेऽपि कथमात्मा शरीरं परित्यजति अथवा व्यापकत्वेऽपि देहत्यागदशायां मृतपिण्डे तदीया व्याप्तिः कथं स्वीकर्तुं शक्या। व्यापकेन आत्मतत्त्वेन ब्रह्माण्डस्य कोऽपि पदार्थोऽपृष्टो न भवेत्। इदमात्मतत्त्वस्य सन्दर्भे भौतिकं विश्लेषणमस्ति। यथा बहुषु पात्रेषु पयसि दृश्यमानश्चन्द्र एकोऽपि अनेकासु आकृतिषु प्रतिबिम्बितो भवति, तत्रापि च अनेकासामाकृतीनां याथार्थ्यं नास्ति, तथैव अनेकेषु प्राणिशरीरेषु अनुभूयमानं चैतन्यमेकस्यैव आत्मनः प्रतिबिम्बितमस्ति तत् तावदेव भासते यावत् शरीरे प्राणाः तिष्ठन्ति। एवं प्राणानामात्मना सह तादात्म्यं विद्यते।

उक्तोदाहरणेन सिद्ध्यति यत् युक्तिश्रुतिभ्यां साध्यमिदमात्मत्त्वं यद्यपि लौकिकप्रत्यक्षस्य विषयो नास्ति तथापि अलौकिकं प्रत्यक्षं तस्य स्वीक्रियते। तदीयः एव जीवं जन्म-मृत्य्वोः बन्धनात् मुक्तं विधायामरत्वं प्रददाति। तदेव मोक्षरूपः तुरीयः पुरूषार्थो वर्तते। कथं च आत्मसाक्षात्कारो

मुक्तिसाधनमित्यस्मिन् वर्तते। अस्य तात्पर्यमस्ति—आत्मज्ञानी जन आत्मसाक्षात्कारे सति आत्मन्येव सति आत्मन्येव अवस्थितो भवति। तदा सर्वेभ्यः काम्यनिषिद्धकर्मभ्यो मुक्तो भूत्वा जीवः स्वबन्धनराहित्यमनुभवति अथवा ज्ञानबलेन अविद्याया आवरणं विच्छिद्य जीव आत्मना सह ऐक्यमनुभूय आनन्दं लभते। एवं यथार्थतस्तु भेदबुद्धे-र्विनाश एव आत्मसाक्षात्कारस्य साधनमस्ति। आत्मनः स्वरूपेणावस्थितिस्तु मोक्षः। यदा जीवशरीरस्थ आत्मा आत्मनो मूलस्वरूपेऽवस्थितो भवति तदा स येन प्राणिशरीरेण सम्बद्धो भवति तेन सञ्चितानि कर्माणि दग्धुं प्रभवति, अतः तस्य मुक्तात्मनः प्राणिनः सञ्चितानि कर्माणि फलोपभोगाय स्वपरिणामान् जनयितुं न क्षमन्ते। आत्मा एव सर्वश्रेष्ठं तत्त्वं भवति, स आत्मा एव दर्शनशास्त्रस्य प्रधानं लक्ष्यमस्ति।

श्रीमद्भगवद्गीतायामत्मनो व्यापकं चिन्तनं प्रस्तुतमस्ति। तद् दृष्ट्वा तु इदमेव वक्तुं शक्यते यद् भारतीयमानवस्य जीवनचर्यैव आत्मानं क्रेन्द्रीकृत्य प्रवर्तिता अस्ति। आत्मना सम्बद्धानां चतुर्णां पुरुषार्थानां प्रतिपादनं भारतीयानां जीवनचर्याविषये मनीषिभिः पूर्वमेव तदनुसारेणात्र धर्मार्थकाम-मोक्षाश्चेति जीवनस्य चत्वारः पुरुषार्था नियताः सन्ति। चतुर्षु पुरुषार्थेषु यत्र धर्मस्य आद्यं स्थानं तत्र मोक्षस्य अन्तिमं स्थानं च वर्तते। धर्ममोक्षयोर्मध्ये अर्थकामौ तिष्ठतः, एतावपि धर्ममोक्षयोः सम्पूरकौ स्तः। यतो हि उभयोरनयोरभावे धर्ममोक्षयौ सम्पन्नौ न भवतः। प्रवृत्तिं विना निवृत्तिः सम्भवा नास्ति। एवं पुरुषार्थचतुष्टयमेव भारतीयजीवनस्य केन्द्रबिन्दुरस्ति। चरमपुरुषार्थरूपो मोक्षः सर्वोत्कृष्टो वर्तते। अस्य दिव्यता वस्तुतः अलौकिकी अस्ति। देवा अपि मोक्षस्यानन्दानुभवितुमात्मानं वञ्चिता अवगच्छन्ति। यद्यपि मोक्षावस्थायामात्मसाक्षात्कारस्योल्लेखः शास्त्रेषु कृतः, तथापि कथम् आत्मसाक्षात्कारो भवति, न वा इत्यस्य किं प्रमाणम्? लोके चैतन्यमात्रमात्मा, स च शक्तिरूपः क्रियारूपो वा व्यवहारे तस्यानुभवो जायते। कथं च चक्षुषा तद्दर्शनमित्यपि दर्शनस्य समस्याऽस्ति। आसां समस्यानां समाधानमेव दर्शनशास्त्रस्य लक्ष्यो वर्तते।

ततः वैराग्येण आशयशुद्धिप्रभृतिभिः विभावैः भवति। अत्र पतञ्जलिदर्शानुसारेण योगप्राप्त्यर्थं मुख्यं सोपानमभ्यासवैराग्यद्वारा भवति। सांसारिक-भोग्यवस्तु प्रति विराग एव अनासक्तभाव एव वैराग्यम्। योगदर्शने कथ्यते.. **अभ्यासवैराग्याभ्यां तन्निरोधः**[4]। प्रत्यक्षादि-प्रमाणद्वारा सत्यासत्यं ज्ञात्वा सत्यग्रहणमसत्यवर्जनमेव वैराग्यम्, विवेको भवति वैराग्योत्पत्तेः साधनम्। विवेको भवति सत्यासत्ययोः, जड-चेतनयोः, धर्माधर्मयोः, शुभाशुभयोः परिज्ञाता। वैराग्यं जन्मजन्मान्तरस्य विषय-भोगरूपसंस्कारं क्षीणीकरोति। व्यासभाष्ये उक्तम्... **चित्तनदी नामोभयतोवाहिनी वहति कल्याणाय, वहति पापाय च। या तु कैवल्यप्राग्भारा विवेकविषयनिम्ना सा कल्याणवहा। संसारप्राग्भाराऽविवेक-विषयनिम्ना पापवहा। तत्र वैराग्येण विषयस्रोतः खिलीक्रियते,**

**विवेकदर्शनाभ्यासेन विवेकस्रोत उद्घाट्यत इत्युभयाधीनश्चित्तवृत्तिनिरोधः**[5]। आशयशुद्धिः इत्यत्र बाह्यशुद्धिस्तथा आभ्यान्तरशुद्धिः। तत्र योगदर्शनोक्त पञ्चचित्तवृत्तीनां निरोधद्वारा चित्तशुद्धि-र्भवति। प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतीनां सर्वाषां क्लिष्टाक्लिष्टानां वृत्तीनां निरोधोऽभ्यास-वैराग्याभ्यां भवति।

तस्य अभिनये यमो, नियम, आध्यात्मिक-भावना, शमो, दमो, तितिक्षा, श्रद्धा, ज्ञानं, धारणा, उपासना, सर्वभूतेषु दया, लिंगं ग्रहणादिकं च इति एभिः अनुभावैः प्रयोगो भवति। यमो, नियमो, ध्यानं, धारणा इति चतुष्टयं तु पातञ्जलयोगदर्शने अष्टाङ्गयोगाङ्गस्यान्तर्भूक्ताः। तत्र शम-दम-तितिक्षा-श्रद्धाः सर्वे तु वेदान्तदर्शनाश्रित-शमादिषट्कसम्पत्तिषु अन्तर्भूक्ताः। वेदानेतसारे उक्तम्... **शमादयः तु शम-दम-उपरति-तितिक्षा-समाधान-श्रद्धाख्याः। शमः तावत् श्रवणादि-व्यतिरिक्तविषयेभ्यो मनसो निग्रहः। दमो बाह्येन्द्रियाणां तद्व्यतिरिक्त-विषयेभ्यो निवर्तनम्। निवर्तितानामेतेषां तद्व्यतिरिक्तविषयेभ्य उपरमणम् उपरतिः। अथवा विहितानां कर्मणां विधिना परित्यागः। तितिक्षा शीतोष्णादिद्वन्द्वसहिष्णुता। निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम्। गुरूपदिष्ट-वेदान्त-वाक्येषु विश्वासः श्रद्धा**[6]।। ततः व्याभिचारिभावाः निर्वेदः स्मृतिः धृतिः सर्वाश्रमशौचः स्तम्भः रोमाञ्च इत्यादयः। तथा उक्तम् अभिनवभारत्याम् **मोक्षाध्यात्मनिमित्तस्तत्त्वज्ञानार्थहेतुसंयुक्तः।निःश्रेयसधर्मयुक्तः शान्तरसो नाम विज्ञेयः**[7]।।ननु मिथ्याज्ञानमूलो विषयगन्धस्तत्त्वज्ञानात्प्रशाम्यतीति दुःखजन्मसूत्रेणाक्षपादपादै-र्वेदद्भिर्मिथ्याज्ञानानां अपचयकारणं तत्त्वज्ञानं वैराग्यस्य दोषापायलक्षणस्य कारणमुक्तम्। ननु वैराग्यं निर्वेदः। निर्वेदो हि शोकप्रवाहप्रसररूपश्चित्तवृत्तिविशेषः। वैराग्यं तु रागादीनां प्रध्वंसः। किं च निर्वेदो नाम सर्वत्रानुपादेयताप्रत्ययः। वैराग्यलक्षणस्य च तत्त्वज्ञानस्य प्रयुक्तोपयोगी। विरक्तो हि तथा प्रयतते यथा अस्य तत्त्वज्ञानमुत्पद्यते। तत्तवज्ञानाद्धि मोक्षः। न तु तत्त्वं ज्ञात्वा निर्विद्यते निर्वेदाच्च मोक्ष इति। **वैराग्यात् प्रकृतिलयः**[8]।

शान्तरसेन मोक्षं प्रवर्तितं भवति। अस्मिन् रसे अध्यात्मभावो मोक्षभावश्च मुख्यतया वर्तते। तत्त्वज्ञानं यद्वा आत्मज्ञानं तत्र लक्ष्यं निःश्रेयसमत्रउपदिष्टम्। इन्द्रियसंयोमेन सर्वजीवेषु प्राणिषु सुखकामनाबुद्धिः अध्यात्मबुद्धिः इति ये भावाः ततः निष्पद्यते शान्तरसः। तत्र न सुखमस्ति, न वा दुःखमस्ति, न द्वेषम्, नापि मत्सरः। सर्वभूतेषु च भवति समभावः रागद्वेषविवर्जितः। उक्तमेव – **न यत्र दुःखं न सुखं न द्वेषो नापि मत्सरः। समः सर्वेषु भूतेषु स शान्तः प्रथितो रसः**[9]।।

भरतमुनिना उच्यते रतिप्रभृतिभावाः विकारमात्रम्, प्रकृतिः तत्र शान्तः। शान्ताद् भावादेव सर्वे अन्ये रसाः विकाररूपेण जायन्ते स्वं स्वं निमित्तमासाद्य। पुनश्च निमित्तविनाशे ते सर्वे भावाश्च

विकाररूपा भावाः शान्ते एव विलीना भवन्ति शान्तरसव्याख्या इत्येव भरतमुनेर्मतम्। आत्मज्ञानरूप आत्मोपलब्धिरूपः शान्तरस एव सर्वेषां रसानां मूलाश्रयः तस्मादेव किंचित् कारणवशाद् विकाररूपा अन्ये रसाः समुद्भवन्ति। कारणनाशे तेषां रसानां प्रविलयः अस्मिन्नेव शान्तरसे भवति। शान्तस्तु विकाररहितः। उक्तमेव—**भावा विकारा रत्याद्याः शान्तस्तु प्रकृतिर्मतः। विकारः प्रकृतेर्जातः पुनस्तत्रैव लीयते ।। स्वं स्वं निमित्तमासाद्य शान्ताद् भावः प्रवर्तते। पुनर्निमित्तापाये च शान्ते एवोपलीयते**[10]**।।** इत्यत्र प्रकृतिः शान्तरसः सत्त्व-रज-तमसां साम्यावस्था। सांख्यदर्शने गुणाः सत्त्वरजतमांसि क्रमशः सुखदुःखमोहात्मकाः सन्ति। शान्तरसो निर्विकारः, विकाररूपा भवन्ति शृङ्गार-हास्य-करुण-रौद्र-वीर-भयानक-वीभत्स-अद्भुताः इति अष्टौ रसाः सन्ति। अव्यक्तप्रकृतेः तथा महत्-अहंकार-पञ्चतन्मात्रादिप्रकृतिविकृतीनां तथा षोडश-विकृतीनामालोचना प्राप्यते। सांख्यदर्शने मूलप्रकृतिरविकृतिः। रत्यादय एवाष्टौ चित्तवृत्तिविशेषा उक्ताः।

अत एव कथंप्रकारेण शम-स्थायिभावाद्विभावानुभावव्यभिचारिसंयोगेन वेदान्तदर्शनानुसारेण शान्तरसस्य निष्पत्तिर्भवति तत्व्याख्यानार्थमभिनवगुप्तद्वारा अभिव्यक्ति-वादस्यालोचना इत्यत्र क्रियते। अभिनवगुप्ताचार्येण अभिव्यक्तिवादे स्पष्टतया उक्तं मानवानां भावाश्रिते कथं आत्मचैतन्यस्योदयो भवति, चित्तैकाग्र्यं सम्भवति। काव्यपाठकाले नाट्याभिनयदर्शनकाले च सहृदयाः सामाजिकाः प्रथममेव विभावानुभाव-सञ्चारिभावविषये ज्ञानं लभन्ते। ततश्चैतैः काव्यनाट्यादिषु वर्णितश्चरित्रगतः स्थायिभावोऽभिव्यक्तो भवति। तदनन्तरमेते विभावानुभाव-व्यभिचारिभावाः चरित्रनिष्ठाः स्थायिभावाश्च सहृदयानां सामाजिकानां समीपे देशकालपरिवेशादीनां संकीर्णतामतिक्रम्य साधारणाकारेण प्रतिभाताः भवन्ति। इदमेव साधारणीकरणनाम्ना व्यपदिश्यते। साधारणाकारेण प्रतीयमानैरेतैर्विभावादिभिः सामाजिकचित्ते वासनाकारेण सूक्ष्मरूपेण विद्यमानै रत्यादयः स्थायिभावाः समुद्बुद्धा जायन्ते। सहृदयचित्ते उद्बुद्धा एते स्थायिभावाः चरित्रगतस्याभिव्यञ्जितस्य मानसिकभावसैवानुरूपाः। चित्ते स्थायिभावानां एतेषामुद्बोधनेन समं मनः एकाग्रभावेन तान् प्रति निबद्धं भवति। सामाजिकचित्तं प्रथमादेव काव्यगतरचनावैशिष्टेन नाट्यगताभिनयचातुर्येण बाह्यविक्षेपकारकाणां वस्तुसमूहानां चिन्ताविषयात् साधुरूपेण निवृत्तिं लभते। एवमुद्बुद्धेषु वासनाकारेण विद्यमानेषु रत्यादिस्थायिभावेषु अनायासेनैव चित्तस्य एकाग्यता सम्भवति। अस्मिन् भावाश्रिते चित्ते आत्मचैतन्यस्य प्रकाशो जायते। अयमेव ब्रह्मास्वादसहोदरो रसः।

काव्यप्रकाशकृता संक्षेपेण अभिनवगुप्तस्य व्याख्यानमेवं समुपस्थापितम्- **सामाजिकानां वासनात्मतया स्थितः स्थायी रत्यादिको, नियतप्रमातृगतत्वेन स्थितोऽपि साधारणोपाय-बलात्, तत्कालविगलित-परिमित-प्रमातृभाव-वशोन्मिषित-वेद्यान्तरसम्पर्कशून्यापरिमित-भावेन प्रमात्रा सकल-सहृदय-संवादभाजा साधारण्येन स्वाकार इवाभिन्नोऽपि गोचरीकृत-श्चर्व्यमाणतैकप्राणो विभावादि-जीवितावधिः पानकरसन्यायेन चर्व्यमाणः, पुर इव परिस्फुरन् हृदयमिव प्रविशन् सर्वाङ्गीनमिवालिङ्गन् अन्यत् सर्वमिव तिरोदधत् ब्रह्मास्वादमिवानुभावयन् अलौकिक-चमत्कारकारी शृङ्गारादिको रसः। स च न कार्यः। विभावादिविनाशेऽपि तस्यसम्भवप्रसङ्गात्। नापि ज्ञाप्यः, सिद्धस्य तस्यासम्भवात्।अपि तु विभावादिभि-र्व्यञ्जितश्चर्व्यणीयः इत्यादिभिः उल्लिखिता श्रामदभिनवगुप्ताचार्येण**[11]।

संस्कारवशाद्वासना स्मृतिरूपेण परिणमते। वासना किं, पातञ्जलदर्शने उक्तम्— **ततस्तदविपाकानुगुणानामभिव्यक्तिर्वासनानाम्**[12]। द्विविधा वासनाः विद्येते, ते स्मृतिफला जात्यायुर्भोगफलाश्च। जात्यायुर्भोगफला एकानेकजन्मभवा इति पूर्वमेव कृततमन्निश्चयः। यास्तु स्मृतिमात्रफलास्ततः कर्मणोऽन्यादृक्शरीररमारब्धं देवमानुषतिर्यकादिभेदं तस्य विपाकस्य या अनुगुणा अनुरूपा वासनास्तासामेव तस्मादभिव्यक्तिर्वासनानां भवति। येन कर्मणा पूर्वं देवतादिशरीरमारब्धं जात्यान्तरशतव्यवधानेऽपि पुनस्तथाविधस्यैव शरीरस्यारम्भे तद्दशायां नरकादिशरीरोपभोगवासना व्यक्तिमायान्ति। आसामेव वासनानां कार्यकारणभावान् आह **जातिदेशकालव्यवहितानामप्यानन्तर्यं स्मृतिसंस्कारयोरेकरूपत्वात्**[13]। जातिदेशकाल-व्यवधानेऽपि तासां स्वानुरूपस्मृत्यापि फलसाधन आनन्तर्यमेव। अनुष्ठीयमानात् कर्मण-स्चित्तसत्त्वेन वासनारूपाः संस्काराः समुत्पद्यन्ते। स च स्वर्गनरकादीनां फलानां चाङ्कुरीभूतः कर्मणां वा यागादीनां शक्तिरूपतयावस्थानं कर्तुर्वा तथाविधभोगभोकेतृत्वरूपं सामर्थ्यम्। संस्कारात् स्मृतिः स्मृतेश्च सुखदुःखोपभोगः, तदनुभवाच्च पुनरपि संस्कारस्मृत्यादयः। स्मृतिविषये उक्तम्- **संस्कारमात्रजन्यज्ञानं स्मृतिः**[14]।

*बुद्धचरितं* धार्मिककाव्यम्, इत्यत्र यम-नियम-ध्यान-धारणादीनामालोचना विद्यते। संयम-त्याग-शिक्षा-जितेन्द्रियता-अनासक्ति-सत्योपलब्धि-अहिंसानिष्कामता-इत्यादिविषयाणामलोचना गम्भीरतया स्पष्टतया च *बुद्धचरिते* प्राप्यते। अत एव बुद्धचरितम् इति काव्यपाठात् सहृययानां चित्तं निर्मलं भवति। सहृदया के इति विषये ध्वन्यालोके उक्तम्... **येषां काव्यानुशीलनाभ्यासवशाद् विशदीभूते मनोमुकुरे वर्णनीयतन्मयीभवनयोग्यता ते एव हृदयसंवादभाजः सहृदयाः**[15]। निर्मलचित्तं स्वभावतः शान्तं भवति। निर्मलत्वस्य लक्षणमभिनवगुप्ताचार्यमहोदयेन उक्तम्**... नैर्मल्यं**

**चातिनिविरसजातीयैकसंगतिः।। स्वस्मिन्न भेदाद् भिन्नस्य दर्शनक्षमतैव या। अत्यन्त-स्वप्रकाशस्य नैर्मल्यं तद् गुरूदितम्**[16]।। *बुद्धचरितम्* इति काव्यपाठकाले सहृदयपाठकानां हृदये विभावानुभावव्यभिचारिवशात् सुप्ताकारेण वासनाकारेण च विद्यमानः शमरूपस्थायिभावः शान्तरसरूपेण अभिव्यक्तो भवति। परंतु अभिनवगुप्तेन निगदितम रसः केवलानन्दस्वरूपमेव, न तत्र दुःखमस्ति... **अस्मन्मते संवेदनमेवानन्दमास्वाद्यते। तत्र का दुःखाशङ्का। केवलं तस्यैव चित्रताकरणे रतिशोकादिवासनाव्यापारः। तदुद्बोधने चाभिनयादिव्यापारः। अत एव आनन्द-रूपता सर्वरसानाम्**[17]।।

********

आकरनिर्देशः

[1]भ.ना. षष्टाध्यायः पृ-१३७

[2]तदेव सप्तमाध्यायः पृ-१५४

[3]भ.गी ४३३

[4]यो.सू. १.१२

[5]व्यासभाष्यम् १.१२

[6]वे.सा. १२

[7]अ.भा. षष्टाध्यायः पृ-३३३

[8]सा.का. ४५

[9]अ.भा. षष्टाध्यायः पृ-३३४

[10]तदेव

[11]काव्यप्रकाशः ४ पृ-१३

[12] यो.सू. ४.८

[13]तदेव ४.९

[14]तर्कसंग्रहः स्मृतिलक्षणम्

[15]ध्वन्यालोकः, लोचनटीका पृ-१३

[16]तन्त्रालोकः ३.७.८

[17]अ.भा. ६.३३

## उपसंहृतिः

येन दृश्यते विचार्यते साक्षात् ज्ञानं प्राप्यते तदेव दर्शनमस्तीति विचारेण साक्षात्ज्ञानमेव तत्त्वज्ञानमस्ति। तेनैव अभ्युदयनिःश्रेयसोः सिद्धिर्भवति। इदं तत्त्वज्ञानं भारतीयैः मन्त्रदृष्टभिः महर्षिभिः स्वकीयया नवनवोन्मेषशालिन्या प्रज्ञया साक्षादनुभूतं भवति। तेषां जिज्ञासायाः परिणामस्वरूपमेव सम्प्रति दर्शनशास्त्रस्य विस्तृतो न्यासो विद्यमानोऽस्ति। समग्रस्य भारतीयचिन्तनस्य आधारभूतानि षड्वैदिकदर्शनानि सन्ति। अवैदिकदर्शनेषु यानि भारतवर्षे पल्लवितानि तान्यपि तत्त्वान्वेषणपूर्वकं ज्ञानोपलब्धिं प्रति अग्रेसराणि दृश्यन्ते। भारतवर्षे दार्शनिकचिन्तनस्य प्रारम्भो यथार्थतस्तु उपनिषद-कालात्सञ्जातः। इतःपूर्वं वैदिककाले दार्शनिकता तु विद्यमानता आसीत् किन्तु तस्या एतावान् विकासो नासीत्। तत्र तर्कपूर्णस्य अन्वेषणस्य प्रवृत्तिः नावर्तत। उपनिषत्सु मानवजिज्ञासाया विस्तारेण सह तर्कस्य ज्ञानाधाररूपता स्वीकृता, किन्तु क्वचिद् गूढज्ञानस्य विषये **नैषा तर्केण मतिरपनेया**[1] इत्यादि उपनिषद्वाक्यान्यपि प्राप्यन्ते। तथापि न्याय-वैशेषिक-सांख्य-योग-वेदान्तेषु विविधेषु दर्शनेषु तर्कपूर्वकयुक्तेः विशेषस्थानं विद्यते।

तर्क एव दर्शनस्य मूलम्, पक्ष-प्रतिपक्षयोः मतविनिमय एव दर्शनस्य भित्तिः। युक्तिहीनो विचारोऽमूलकः। स्वपक्षसाधन-परपक्षखण्डनयोर्मध्ये एकपक्षस्य निवृत्तिः तथा अपरपक्षस्य प्रवृत्ति-र्भवति। अश्वघोषस्य युक्तिवादि हृदयम्, *बुद्धचरिते* चतुर्थसर्गे उदयीद्वारा सिद्धार्थसमीपे भोगसमक्षे या याः श्रुति-स्मृति-समन्विता उपदेशा निगदिताः तान् प्रति सिद्धार्थस्य प्रत्युक्तिः एवम्—विषयस्य स्थायित्वं नास्ति, अत एव क्षणकालीनसुखेन न प्रयोजनम्, चिरन्तन-दुःखप्रतिकाराय मनोनिवेशः करणीयः। उदयी अवदत् यद्यपि रमणीसम्भोगः सिद्धार्थेन नानुमोदितः, तथापि दाक्षिण्यद्वारा रमणीनामनुवर्तनीयः, तदा सिद्धार्थेन प्रत्युत्तरेण द्वा-नवतितमेन श्लोकेन उक्तम्—**अनृतं नावगच्छामि दाक्षिण्येनापि किंचन**। त्रि-नवतितमेन श्लोकेन उक्तम्—**न चानुवर्तनं तन्मे रूचितं यत्र नार्जवम्। सर्वभावेन संपर्को यदि नास्ति धिगस्तु तत्।।** सर्वभावेन इत्युक्तिमध्ये सिद्धार्थस्य स्वपक्षसाधनरूपं सिद्धान्तबीजं प्राप्यते।

अपि च उदयीद्वारा नवसप्ततितमश्लोकेन **ययातिश्चैव राजर्षिर्वयस्यपि विनिगते। विश्वाच्याप्सरसा सार्धं रेमे चैत्ररथे वने।।** तथा अन्यत्रापि नारीसम्भोगसपक्षे या या युक्तिः प्रदत्ता, तादृशी युक्तिः प्रतिकूलभावेन दुर्बला। सिद्धार्थेन षडशीतितमेन श्लोकेन तर्कसमन्वये अनुकूल-भावेन सा युक्तिः खण्डिता—**जरा व्याधिश्च मृत्यश्च यदि न स्यादिदं त्रयम्। ममापि हि मनोज्ञेषु विषयेषु रतिर्भवेत्। अनित्यतां सर्वगतां विचिन्तयन्**...।

आकाश इव निष्पङ्को निर्मलमन्तःकरणमेव सत्यदर्शनस्य प्राथमिकप्रयोजनम्, अश्वघोषः तादृशो दार्शनिक आसीत्। नवमसर्गे दृश्यते मन्त्रि-पुरोहितौ कुमारान्वेषणार्थं भार्गवाश्रममागतौ, ततःपरं कुमारसमीपे राज्ञः शुद्धोदनस्य पुत्रप्रेम, तथा पुत्रविलापद्वारा शोकाकुलावस्थाया वर्णनं कृतौ। तदुत्तरेण सिद्धार्थेन भावनम्रा युक्तिः प्रदत्ता—**पितुः सन्तापकारणं न पुत्रः, अज्ञानमेव...** चतुर्त्रिंशत्तमेन श्लोकेन उक्तम्**...यथाध्यगानामिह संगतानां काले वियोगो प्रजानाम्। प्राज्ञो जनः को नु भजेत शोकं बन्धुप्रतिज्ञात-जनैर्विहीनः॥** बन्धुवियोगो ध्रुवो नित्य इति।

दशमसर्गे विम्विसारस्य उक्तेः त्रिवर्गसेवनमेव पुरुषार्थः इत्यङ्गीकृतः, तत्र त्रिंशत्तमेन श्लोकेनोक्तम्... **तस्मात्-त्रिवर्गस्य निषेवणेन तं रूपमेतत्सफलं कुरुष्व। धर्मार्थकामाधिगमं ह्यनुनं नृणामनुनं पुरुषार्थमाहुः॥** विम्विसारस्य उक्तेः प्रत्युत्तरेण सिद्धार्थेन केवलं चतुर्थपुरुषार्थस्य मोक्षमार्गस्य इच्छा प्रकाशिता। एकादशसर्गे सप्तमश्लोकेन सिद्धार्थस्य वक्तव्यमेतत्-**अहं जन्ममृत्युभयं विदित्वा मुमुक्षया धर्ममिमं प्रपन्नः। बन्धून् प्रियानश्रुमुखान्विहाय प्रागेव कामानशुभस्य हेतून्॥** अपि च विम्विसारसमक्षे युक्तिग्राह्या कामनिन्दा विहिता सिद्धार्थेन नवमश्लोकेन... **कामा ह्यानित्याः कुशलार्थचौरा रिक्ताश्च मायासदृशाश्च लोके। आशास्यमाना अपि मोहयन्ति चित्तं नृणां किं पुनरात्मसंस्थाः॥** जगति कामसमोऽनर्थो न किमप्यस्ति, मोहवशाद् मानवाः कामासक्ताः, अतः तत्त्वं ज्ञात्वा अनर्थ-कामस्य निवारणं करणीयम्।

सिद्धार्थेन प्रतिपदक्षेपं परयुक्तिः खण्डिता, दार्शनिकसदृशा जय-पराजययोः अक्षुब्ध-सिद्धार्थस्य उक्तिः अहंकारवर्जिता। पिता-बन्धु-पुरोहित-मन्त्रि-ऋषि-तपस्विनः सर्वे एव तस्य प्रति-पक्षिणः, प्रतिक्षेत्रं सिद्धार्थो जयी, परंतु कुत्रापि तस्य विजयिभावो न चित्रितोऽस्ति। तत्त्वाभिलाषस्याग्रगतिः केवलं लिपिबद्धा। अश्वघोषस्य *बुद्धचरिते* दार्शनिकतत्त्वानां वैशिष्ट्यानि प्रायशो मुहूर्तकेण लोकचित्ते प्रवेशितानि। कतिपयोक्तिः स्मरणीया.... सप्तमसर्गे अष्टविंशतितमेन श्लोकेन...**आहारशुद्ध्या यदि पुण्यमस्ति, तस्मान् मृगाणामपि पुण्यमस्ति। ये चापि बाह्याः पुरुषाः फलेभ्यो भाग्यापराधेन पराङ्मुखार्थाः॥** आहारशुद्धिद्वारा यदि पुण्यं भवेत् तर्हि मृगाणामपि पुण्यं भवेत्। तीर्थसमक्षे सिद्धार्थस्याभिमतमेवं त्रिंशत्तमेन श्लोकेन....**तथैव ये कर्मविशुद्धिहेतोः स्पृशन्त्यपस्तीर्थमिति प्रवृत्ताः। तत्रापि तोषो हृदि केवलोऽयं न पावयिष्यन्ति हि पापमापः॥** आपः पापं न पवित्रीकुर्वन्ति। गुणा एव तीर्थम्, आपस्तु निःसंशयमाप एव। एवंप्रकारेण युक्तिखण्डनं कृतं सिद्धार्थेन।

चतुर्दशसर्गे दुःखस्य कारणं, तन्निवृत्तिः विषयकालोचना प्राप्यते। चतुर्दशसर्गे सिद्धार्थेन सम्पूर्णरूपेण अवगम्यते यद् द्वादशनिदानं भवागमनहेतुः। इत्यत्र आर्यचतुष्टयं, द्वादश-निदानतत्त्वम्, अष्टाङ्गिकमार्गः, दशभूमिकज्ञानम् इति बौद्धदर्शनोपरि आलोचना प्राप्यते।

********

आकरनिर्देशः

---

[1]क.उप. १.१ .९

# Bibliography


*Abhinavagupta*.Ed. Bengali translation of G.T. Deshpande's book in English By Ratna Basu. New Delhi: Sahitya Akademi, 2015 (2nd ed.) (1st ed. 1996).

Ānandabardhana. *Dhvanyālok,* ( First Uddyota). Ed. with the locana of Abhinavagupta and Bengali translation Satyanarayan Chakraborty. Calcutta (now Kolkata): Sanskrit Pustak Bhandar, 2011 (4th ed.) (1st ed. 1998).

Annṃbhaṭṭa. *Tarkasaṃgraha*. Ed. Narayana Chandra Goswami. Calcutta (now Kolkata): Sanskrit Pustak Bhandar, 1410 BY (3rd ed.).

Aśvaghoṣa. *Buddhacarita.* Ed. Jayasri Chattopadhyay. Calcutta (now Kolkata): Sanskrit Pustak Bhandar, 2008.

_____._____. Ed. with Hindi translation and Hindi commentary Prakāśa Ramcandra Das Sasti. Varanasi: The Chowkhamba Vidya Bhawan, 1962.

_____._____.(Canto 1-5). Ed. With a Sanskrit Commentany by Sri Appashastri and English translation and notes by V.V.Sovani "Buddhacharitam by Sri Ashvaghosha". Poona City: A.C. Bhat at the Yashavant Press,1911.

Bharatamuni. *Nāṭyaśāstra*. Ed. With Bengali translation Suesh Chandra Bandyapadhyay and Chanda Chakraborty. Calcutta (now Kolkata): Nabapatra Pralashan,1980.

*Bhāratīya Darśana Kośa*.(Vol-1). Ed. Sri Mohan Bhattacharya & Dinesh Chandra Bhattacharya. Calcutta (now Kolkata): Sanskrit College, 1958.

*Bhāratīya Darśana*. Ed. Promodbondhu Sengupta and Matilal Mukhopadhyay. Kolkata: Banerjee Publishers, 1964 (2nd ed.).

Bhattacharya, Amit. *Bhāratīya Darśanera Rūparekhā*. Calcutta (now Kolkata): Sanskrit Book Depot, 2009 (3rd ed.) (1st ed. 2003).

*Bṛhadāraṇyaka Upaniṣad*. (Chapter 4, Brāhmaṇa 4th and 5th). Ed. With Bengali translation Jharna Bhattacharya and Sanskrit Commentary by Śaṃkarācāya. Calcutta (now Kolkata): Sanskrit Pustak Bhandar, 1999 (2nd ed.) (1st ed. 1976).

Chattopadhyay, Jayasri. *Alaṃkāra Sāhityera samṛddha Itihāsa.* Calcutta (now Kolkata): Sanskrit Pustak Bhandar, 1413 BY (2nd ed.).

Dasgupta, Surendranath. *A History of Indian Philosophy*, London: Cambridge University Press, 1922.

Goswami,Sitanath. *Kaṭhopaniṣad*. Calcutta (now Kolkata): Sanskrit Pustak Bhandar, 2002.

Mādhava Āchārya. *Sarva-Darśana-saṃgraha*. Ed. Uma Shankar Sharma Rishi. Varanasi: Chowkhamba Vidyabhawan, 2016.

Mammata. *Kāvyaprakāśa.* Ed. Rāmānanda Ācārya. Calcutta (now Kolkata): Sanskrit Pustak Bhandar, 1386 BY.

*Pātañjala Darśana*. Ed. Sri Purna Chandra Sharma. Calcutta (now Kolkata): 62 no. Amherst Street,1898.

Patanjali. *Yoga Darśana*. Ed. with Vyāsa-bhāṣya and Hindi translation Swāmī Satyapati Parivrājak. Gujarat: Darshan Yog Mahavidyalaya, 2003 (2nd ed.).

Praśastapāda. *Praśastapādabhāṣya.* Ed. Narayana Mishra. Varanasi: Kashi Sanskrit Granthamala, 1966.

Sadānandra-Yogindra. *Vedāntasāra*. Ed. with Bengali translation Bipad Bhanjan Paul *Vedāntasāraḥ*. Calcutta (now Kolkata): Sanskrit Pustak Bhandar, 1982.

Saṃkara-Miśra. *Vaiśeṣikasūtroposkāra.* Ed. Shaikh Sabir Ali. Calcutta (now Kolkata): Sanskrit Book Depot, 2013.

*Saṃskṛta Sāhitya Sambhāra*.(vol.1).Ed. Advised by Gourinath Sastri and Bengali translated by Rabisankar Bandyopadhyay, Jyoti Bhushan Chaki, Tarapada Bhattacharya, Murarimohan Sen.Calcutta (now Kolkata): Nabapatra Pralashan, 1958.

Shukla, Dinanath. *Bhāratīya Darśana Paribhāṣā Kośa.* Delhi: Pratibha Prakashan, 1993.

*Śrīmad Bhagavadgītā*. With Bengali translation & transliteration. Gorakpur: Gita press,2014.print.

Udayanācārya. Ātmatattvaviveka. Ed. with Hindi translation by Ācharya Kedarnath Tripathi. Varanasi: Chowkhamba Vidyabhawan, 1992 (2nd ed.).

*Upaniṣads.*Ed. Swami Gambhirananda. Calcutta (now Kolkata): Advaita Ashrama, 2009.

Vācaspati-Miśra. *Sāṃkhyattakaumudī.* Ed. Narayana Chandra Goswami. Calcutta (now Kolkata): Sanskrit Pustak Bhandar, 1406 BY.

Yaska. *Nirukta.* Ed. With Bengali translation Uday Chandra Bandyopadhyay. Calcutta (now Kolkata): Sanskrit Book Depot, 1421 BY.

********